VISVAKAVI VISVANIGHANTUH

विश्वनिघण्टु :

VIŚVANIGHAṆTUH

Edited by

Dr. S. RAJALAKSHMI

General Editor

Natana Kasinathan M.A.

MADRAS GOVERNMENT ORIENTAL MANUSCRIPTS SERIES - 71

VIŚVANIGHANTUḤ

Editor
Dr. S. RAJALAKSHMI, M.A., Ph.D.,
Sanskrit Pandit,
Government Oriental Manuscripts Library, Madras-5

General Editor
Natana Kasinathan, M.A.,
Director,
Department of Archaeology
Madras - 113

Price Rs.78/-

Government Oriental Manuscripts Library, Madras-5
1995

GENERAL EDITOR'S NOTE

Visvanighantu is a lexicon work in 12 chapters dealing with words and their different meanings.

The author of this work is Visvakavi. No details are known about the author. The work is named after him. The text is in verse form and consists 800 slokas in Anustubh metre.

This work is an edition of the manuscript preserved under D.1744 in Telugu character.

No doubt, this lexicon will be of great use to Sanskrit scholars and learners.

I duely express my thankfulness to the Tamilnadu Govemment, for bringing out this publication, particularly Mr.S.P. Ilangovan, I.A.S., and R. Christodass Gandhi I.A.S. I also thank Dr. S. Soundarapandian, Curator, Govt. Oriental Manuscripts Library and S. Rajalakshmi, Sanskrit Pandit, the editor of this work.

By

Natana Kasinathan

PREFACE

Government Oriental Madras Library has published many books based on manuscripts. In sanskrit there are 102 publications including catalogues, bulletin & books.

Manuscripts are acquired by way of purchasing and collecting as donations.

The present edition is the number 7: in the Madras Government Oriental Manuscripts series.

I thank the former secretary, Mr. S.P. Elangovan, I.A.S. Tamil development department for bringing out the publication.

I thank Thiru. Natana. Kasinathan, Director of Archaeology, Tamil Nadu.

I thank Dr. S. Rajalakshmi who has edited the work and prepared the press copy.

Dr. S. Soundarapandian

M.A. (Tamil) M.A.(Eng).B.Ed.
Dip. in Skt, Phd.

Kannan, Murugan Deva: Concepts Discovered

Dr.S. Soundarapandian,
M.A.,M.A.,B.Ed., Dip.Skt.,Ph.D.,
Curator
Govt.Oriental Manuscripts Library
University Library Building
Madras- 600 005.

Orthodox Views

1. Kannan

Present view among the people of Tamilnadu (S.India) and rest of Indian states is that the person kannan is nothing but the Lord Krishna.

2. Murugan

People of Tamilnadu and other parts of India are under the impression that the name denotes only the Lord Subramanya celebrated in Sanskrit puranas.

3. Deva

Deva, to the people of India, in general, means only the personalities associated with heaven described at length in 18 puranas and many other minor puranas ('upa puranas')

Concepts Discovered

All the above three notions are baseless.

These three ideas have been conceived by the people of Tamil Soil even before the socalled puranas were written. Let

us explain in what fashion the Tamils had been knowing the three concepts.

Concepts Explained

1. Kannan

'Kannan' is a stage in the boyhood of any male child, say when the boy is in between his third and sixth year of age.

Etymologically, the Tamil root 'kan' means, 'well formed and fleshy' So, when a boy reaches this stage, he is called by mother affectionately as 'kanna' or 'kannan'. This has nothing to do with any puranic character.

This concept must have been in vogue amidst Tamils long before the puranas were evolved. Illiterates, still in villages of Tamil country, do call their male children as 'kannan'.

2. Murugan

Like 'kannan' 'Murugan' is also a stage in the development of a male child. These stages, however, have not been not identified and inserted in Tamil grammar treatises. For the first time these stages are identified here.

At a particular stage of a male child, we do, practically, experience that he gets angry for each and everything he does not like. In his anger, he often tends to go to a distance (say 5 metres) place or climb on some elevated place like table. Anybody can, now, identify this state of male child. At that stage, the male child is termed as 'Murugan'; for 'Muruga' the Tamil part, means 'anger'. Only based on this concept, though not identified, Lord Murugan of Tamil Soil must have been written in puranas as the one who in his fury want to the top of a hill and settled there for ever. The stage of the puranic Murugan and our stage noted above do tally.

So, when a Tamil mother calls a male child, 'Muruga', it does not necesserily denote Lord Muruga.

3. Deva

Again, 'Deva' does not necessarily mark the purnaic 'devas' full of magical powers.

Tamil word 'deva' gives a meaning as 'one who is noble' an other words with good virtues was termed as 'deva' in Tamil.

When a drink, say milk, is lauded as 'devamrtum', in Tamil country, it has no link with the concented nectar churned out by devas. In fact, only from the tone of the term 'devamrtum' which means only 'good drink', the whole puranic story of devas churning the sea for neatar must have been knitted.

Deva means, to put it in simple terms man loftly with ideas. In fact, in many chola inscriptions we find the 'deva' as suffix after the celebrated cholas such as 'Rajaraja' chola deva, 'Rajendra chola deva etc.

So, the concepts Kannan, Murugan and deva had been known to the Tamil long before the advent of puranas.

More about roots

Let us discuss here more about the above mentioned Tamil roots.

1. 'Kan'

Only from the Tamil portion 'kan', the words 'Kandu' (bundle of thread), kan (eye) etc had been formed. In these words, the root 'kan' does possess the meaning, 'well formed and fleshy'.

2. 'Murugan'

Anger is some distorted nature in man. So, the distorted or turned physical state of the heated sugar solution is known as 'Murugiyadhu' (distorted solution due to excess heat)

3. 'Deva'

The part 'deva' itself convery a meaning, 'elevated'. That is why the Tamil word 'deivam' is able to mark god.

So, it is evidient, all there do attest our claim.

विश्वनिघण्टु

आमुखम्

सर्वोत्कृष्टा, सर्वत्र समरुपा, सर्वजनमान्या भवति गैर्वाणी। गैर्वाण्यां सर्वोत्कृष्टं कोशं अमरसिंहकृतं नामलिङ्गानुशासनमित्यत्र न कोऽपि सन्देहः। 'अष्टाध्यायी जगन्मातामरकोशो जगत्पिता' इत्युक्तिः साधुरेव। अमरकोशानन्तरमपि बहवः निघण्टवः रचिताः।

विश्वनिघण्टुर्नाम प्रस्तुतकोशः विश्वकविप्रणीतः, द्वादशाध्याये विद्यते। कविः, कुत्र, कस्मिन् काले ग्रन्थामिमं अरचयदिति न कोऽपि ज्ञानः। एतेन कोशेन संस्कृतभाषायां विद्यमानानां नानाविधशब्दानां, नानार्थाः श्लोकरुपेण निर्दिष्टाः। एतादृशं कोशं मुद्रणं क्रियते चेत् सर्वेषां भाषाकोविदानां, विद्यार्थिणां च अत्यन्तं उपकारय भविष्यति इति विचिन्त्य, ग्रन्थालयस्थमूर्द्धन्यविद्वांसः मां प्रति एतत्कोशलेखनाय उपदिष्टवन्तः। तेषां मतानुसृत्य लिखितमिंद कोशं संस्कृतभाषायाँ कोऽपि अमूल्याग्रन्थः इति निस्सन्देहं वक्तुं शक्यते।

ग्रन्थोऽयं तालपत्रे तेलुगुलिप्यां, D 1744 सङ्ख्यायां लिखितम्। अस्य देवनागरीलिपिकरणं मया, तेलुगु पण्डितवर्येण विद्वान् - टि.श्रीधरमूर्तिण सहायेन कृतम्। अस्मिन्नवसरे पण्डिताय श्रीधरमूर्तिवर्याय मम धन्यवादः प्रकटितम्।

इत्थम्

एस्. राजलक्ष्मीः

विश्वनिघण्टुः

श्रीवाणीपरमानन्दनिदानं पदपङ्कजम्।
अज्ञानान्धनिमग्नानां प्रकाशनमुपास्महे॥

मातामहमहाशैलं महस्तदपितामहम्।
जगतः कारणं वन्दे कण्ठादुपरि वारणम्॥

कारणं चादिजगतां मरणार्थमनागसम्।
वारणाननमात्मानमद्वयं समुपास्महे॥

सर्वव्याकरणाम्भोधिं सर्वकोशमहोदधिम्।
विलोडय वाणीजनित कवितानन्दनिर्भर :॥

कविराणमस्तकारोहकौतूहलसमन्वितः।
वीरो विश्वकविर्विश्वकोशं पूर्णं करोतिसः॥

सारङ्गश्चन्द्रहंसाब्जचातके गजभृङ्गिषु।
वीणावादितकन्दर्प शङ्करार्यमवारिषु

राजसूर्येन्दुकालाक्षविष्णुवैश्रवणेषुच।
कादम्बे वृषभे शक्रे सुपर्णे वारिदे नृपे॥

हससूर्येन्दु चन्द्रे च पयोधो हंसमेघयोः।
द्विरेभे पर्वते पद्मे वाणी शांभकरोदुषु॥

नीलकण्ठो मयूरे च गृहावासे च पन्नगे।
गौर्यां शिवे भूनिचये सिते श्वेते हरे निशि॥

काकोदरः काकमूकः पन्नगाभ्रशरीरिषु।
यातुधाने पन्नगे च वाचके पठने जले॥

भद्रो गजे च माङ्गल्ये भद्र........ शुकेपि च।
समारव्ये पारदे नार्यां पद्मे नारायणे शिवे॥

चरस्समीपे गरुडे निर्घोषे चन्द्रसूर्ययोः।
ग्रहताराभ्रमे........ पक्षिभेदे च राक्षसे॥

अण्डजो विहगे सर्पे गदेये गृहगोधिके।
सरमायां शुके लोमे कुक्कुडे पृथुले जले॥

चारः प्रयाणे याने च जवेऽश्वर्याऽलेऽपि च।
संभाषणे च गाम्भीर्थे वर्षे लक्ष्म्याञ्चलक्षणे॥

सूतः पौरोहिते देवे गजेऽश्वे सारथौ जले।
यानपात्रेऽधिके विद्वत्सत्कव्याः क्रमपाठके॥

रामो झर्यां जामदग्नौ कौसल्यानन्दनेऽपि च।
कालिन्दे भेदने रुपे स्वभार्यायां च वाचके॥

बलभूतश्च कष्टाः पद्मं धीवरयोस्तथा।
प्रवादके च चन्द्रे च पुष्पवारिजजन्तुषु॥

घोटकश्चन्द्रसूर्याग्निमेरुराक्षसपक्षिषु।
विद्युता तारके वारौ.....वेदेषु पङ्कजे॥

रवगःसूर्ये च चन्द्रे च शैवे.....ले।
अभ्रे तीरे च देवे च मणौ ब्रह्मर्षिसममे।
उरगो दीर्घमत्स्ये च समीरे पन्नगे बके॥

लक्ष्म्यां धैर्यजलूकायां चितां रुग्मे मृगे शशौ।

धराधरः कुलाद्रेः च.....गे।
.....ल बाणौ च नद्यां च जले कूर्मे च कच्छपे॥

.....यानपात्रे च भूषणे दैवशिञ्जिते।
घटे.....चायुधे च भेर्यां दुन्दुभिलोहयोः॥

चिरायुश्च.....विहङ्गे चिरजीविनि।
काकेबके च मत्स्ये च कूले शैले चिदात्मनि॥

निराकारश्चान्तेरीक्षे शिवे विष्णौ च पर्वते।
...त्यामुमायां लक्ष्म्यां च परब्रह्मणि नात्मनि॥

विषंधरश्च गौरीशे कासारे पन्नगे जले।
मेघे समुद्रे गरुडे मत्स्यकच्छपयोर्निशि॥

भवश्शिवे च आह्वाने पञ्ब्रह्मणि मास्ते।
संसारे उदधौ सर्पे धृते धैर्ये च जन्मनि॥

विविधश्चित्रवर्णे च बहुरुपे बहुक्रमे।
पर्वते शङ्गि सेनायां गङ्गायां नैमिशे मुखे॥

धवनश्शङ्करे चन्द्रे जीवने च जले वने।
आकाशे पर्वते मेघे परब्रह्मणि भीषणे॥

दिवोऽन्तरीक्षे भुवने पन्नगे च विहङ्गमे।
नक्षत्रे देवभेदे च वर्षे नीरे च पल्लवे॥

कोविदः पन्नगे ज्ञाने संसारेमृतलोकयोः।
परब्रह्मणि शैवाले पण्डिते भावने वने॥

स्वयंभुः शङ्करे विष्णौ परब्रह्मणि चात्मनि।
समीरणे पर्वते च गोत्रदेवे च धिक्कृतौ॥

गोत्रः कुले विशे गोत्रे चाकाशे पर्वते जले।
रसने धनुषि भागे गरुढे पन्नगे दिवि॥

अचलः पर्वते लोके ब्रह्माविष्णौ महेश्वरे।
चिदात्मनि चाकाशे मारुते पन्नगे घने॥

वनं जलाशयेऽरण्ये जले....नि पर्वते।
सर्पे मृगे खगे सूर्ये चन्द्रे जलधरे मुखे॥

भुवनं चान्तरीक्षे च गगनस्वर्गे वेदिषु।
संसारे भुवने चक्रे भूधरे पन्नगे पथि॥

गौं स्वर्गे वृषभे रश्मौ चन्द्वज्रमलीषु च।
अर्जुने नेत्रदिग्वाणभूवाग्वारिषु पर्वते॥

हरिर्यमेनिलेन्द्रे च चन्द्रे सूर्ये च शङ्करे।
तुरगे वानरे विष्णौ नाके सर्पे शुके जले॥

अमृतं मोक्षयज्ञाम्बुक्षीरपङ्कजबन्धुषु।
आकाशे.....हस्ते नवनीतेषु चोत्पले॥

स्वर्गं सृष्टौ देवलोके सत्ये वितरणे मुखे।
अध्यो वने च गगने सभायां बुद्धिकौशले।
वज्रं वज्रे..... दित्य रश्मिषु॥

बाणे तूणामस्थिभेदे हीरप्राभवपाङ्क्षिषु।
.....वर्णः मर्कटे विष्णौ शिवपक्षिविशेषयोः॥

सिन्धूरे चेक्षुरवण्डे च धावल्ये ब्राह्मणे जले।
करुणाश्रमर्दहार्थकृपासत्यदयादिषु॥

गृहप्रवेशने नार्यां रक्षणापोषणे मणौ।
संस्कृतं लक्षणोक्तौ च श्रुत्यां स्वर्गे गतौ निधौ।
पक्षिभेदे सभायां च धरण्यां स्थेरसम्पदि॥

आक्रन्दनं रोदने च दौहृत्यं च भयेऽनले।
आदित्ये पक्षिभेदे च.....बलिबन्धने॥

अर्थं धने सुवर्णे च फलवाहनवस्तुषु
बहुमाने चतिशये नित्यकर्मणि भेदने॥

योग: प्रवालके युद्धे संङ्धोष्णो: परिपातने।
.....चित्तवृत्तौ च जातकर्मणि नामके॥

भोग: फणे सुखे कीर्त्यां संयुक्ते भुवने धने।
भागे च मातुलसुते पुत्रे वस्तुपरिग्रहे॥

खगो बाणे धरण्यां च भेकेन्द्रगरुडेष्वपि।
बान्धवे कच्छपे मत्स्ये पक्षिचन्द्रामवाजिषु॥

अजो ब्रह्मणि विष्णौ च शिवे गौर्यां शुभेऽशुभे।
सत्ये छागे च गगने चार्जवे चात्मनि ध्रुवे॥

अब्जस्सुरवे दिनमणौ चन्द्रे.....।
पद्मे सर्पे च कर्पूरे चायुधे च निरन्तरे॥

घृतमभ्योदकक्षीरमधुसूर्यसुरवेषु च।
संसारे विजये रक्ते तक्रे मत्स्ये च गुग्गुले॥

सत्यं साधौ यथार्थे च सम्पत्तौध्वनि युद्धयो:।
विज्ञाने च बले धैर्ये सुतौ चस्थिविशेषके॥

पदं ज्ञाने स्थिराकार वयाहारबदरीषु च।
गमने विभवे मोक्षे पादे दैवे निरन्तरे॥

गोविन्दो हरिगोपाल गिरिगोष्टगवीषु च।
गाने वेणुविशेषे च नि.....लोकनेत्रयो:॥

मधुश्चैत्रे सुरायां च गृहे बिल्वफले जले।
आज्ये मधौ च लवणेपितृपितृमत्मथधूर्जटि॥

सुत: पुत्र: कुकार्योश्च गिरौ दैवे शुभेशुभे।
इन्द्रे मूले मणौ राज्ञि सुरवे चाग्नौ बृहस्पतौ॥

अव्यक्तोऽग्नौ च विष्णौ च सिंहे कीर्त्यां सुहज्जने।
गगने विमले चन्द्रे सत्ये चैवाम्बुधौ शिवे॥

वृत्तान्त: प्रस्तुतौ गोत्रग्रामोपायशरीरिषु॥

नाम्नि वस्त्रे शुभे शैवे वार्तायां चर्माणि ध्रुवे।
हेतिसूर्ये राक्षसे च रश्मौ भस्मनि चायुधे।
इन्द्रे जले गरे चन्द्रे भटज्वालाग्निहेतुषु॥

भूतिर्गणपतौ भुक्तौ मुक्तौ भस्मनि सम्पदि।
उमायां विभवे लक्ष्म्यां धावल्ये परिबन्धिनी॥

श्रुतिश्शास्त्रे बले वेदे मनुष्यकर्णयोस्तदा।
ब्रहमणि ब्रहिमणे दूरे बाणे सूत्रे च कन्धरे॥

भूतं सिद्धे च सत्ये च बुद्धौ चात्ये मणौ तनौ।
आदाभूमौ चिदाकाशे बके चेन्द्रियपञ्चके॥

शक्तिस्थूले दृढगुणे बले देव्यां च तेजसि।
अण्डे भिन्नजले मूर्तौ सहजे विभवे मणौ॥

स्थाणुर्भकि स्थूलदारौ पर्वते सागरेऽपि च।
वृक्षे हरे वैद्ये....पितरि वालुके॥

क्षणं वेदे च संज्ञायां कालवृत्तावृता घटे।
अमावास्यां पौर्णमास्यां यमे दैवे निबन्धने॥

गुणस्सर्वसमृद्धौ च चन्द्रे रक्तमणौ गुणे।
नार्यां धैर्ये जले द्रव्ये सूत्रे वैश्वनरे स्थिरे॥

रणं युद्धे प्रणेभूम्यां राज्ञि भेर्यां स्त्रियप्लवे।
धर्मे धर्मघटे बाणे रहस्ये लेखने ध्वनौ-।
हरिणः कृष्णसारे च कुरङ्गे श्वेतनीलयोः।
हरेहरे च शलभे सूर्ये पर्वतहंसयोः॥

प्रमाणं विदिते सत्ये पञ्चगाने स्तुतौ मणौ।
शास्त्रे वेदे जले काले वैद्ये प्रामाणिके शरे॥

सं..त्स विदिते युद्धे चालके चमरे जये।
रथे गजे च कारुण्ये सहशे सत्यभाषणे॥

न्यग्रोधो वृक्षभेदे च रक्तालम्बन भूमिषु।
अपलायितसेनायां शिवे नागे प्रपाठके॥
परिधि: परिवेषे च शारवाम्बु समिधाग्निषु।
आयुधे चार्यमे चन्द्रे चाङ्गारे बहु ध्वनौ॥

विदुर्विष्णौ जवे वायौ कुबेरानलबन्धुषु।
सूर्ये चन्द्रे शिवे जूवे दर्पणे परिचारके॥

प्रसिद्ध: पर्वते सत्ये धर्मिष्ठे च बले जले।
ख्वात्यामग्रस्थभित्तौ च प्रभावे नूपुरेऽवरे॥

वाजी धनुषि बाणे च तुरगे गरुढे जवे।
नागे सत्ये चित्रखगे वर्षे बाधे च कानने॥

शिखी..पर्वतेऽब्धौ मयूरे कुककुटे शिवे।
नैऋतो घर्षणे वह्नौ सर्पे स्थूले बके शुके॥

घनाघन: पर्वते च वर्षे मेघे च सम्पदि।
गोष्टे युद्धे च येमूके प्रीत्यां चायुधभाविनि॥

घनस्तुङ्गे बले सेतौ गङ्गायां वृक्षदीर्घलो:।
वाद्ये भर्यां गजे चाश्वे चाधौ घटकुचाद्रिषु॥

वाहिनी शत्रुगगन वार्ता सेनामुखेषु च॥

वाचा शुद्धानैकतेब्जे ब्रहमणि ब्राहमणि जले॥

हरिलोमेन्द्रनागाग्नी भेके सिंहाश्च साधुषु।
कृष्णसारे कुरङ्गे च विष्णौ ब्रहमणि चायुधे॥

ब्रहमा वेदाग्निविप्रार्थो परमार्थसुखेषु च।
बुद्धौ विष्णौ मठे शम्भो परब्रहमणि वाचके॥

ग्रन्थः क्रोधे च कर्पूरेऽप्युत्साहे हासहर्षयोः।
नरमांसे बले ग्रन्थे वस्त्रे ग्रन्थे परात्मनि॥

रक्तः पङ्के जले क्षीरे मुखे मत्स्ये चमेधसि।
आकाशे चास्थिभेदे च रक्ते वैद्ये प्रिये शठे॥

अब्दं भित्तौ च दुर्गे.... चाम्बरे मेघवर्षयोः॥

सूर्यो व्याघ्रे वत्सरे च घटिकार्थे शठे लुठे।
प्रसादो राजभवने गढे श्वेतनीलयोः॥

रोग भेदे प्रकृत्यां च बदर्यां हासपादयोः।
सुधाचूर्णे च निटले बालवृक्षे च सूरिणि॥
चन्द्रे सर्पे च बधिरे विद्यायां क्षीरनीरयोः।

पर्णः पर्णे च.....नीरपर्वतदेशयोः।
अश्वे गृहे च सङ्ख्यायां शयने फले॥

मृदु भेकतटे शृङ्गहीनगवीषु च।
अधिके मार्दवे ह्यश्वे विष्णौ जिष्णौ त्र्यंबके॥

हयो इन्द्रे च बडिशे वेगाश्वे च मरीमृगे।
आलस्ययमसम्पूर्ण मणिज्वालेषु सूरिणि॥

विरोचनः पर्वते च राक्षसे शशिसूर्ययोः।
चन्द्रिकायामलङ्कारे धावाश्ववेगयोः॥

आत्माधैर्ये च बुद्धौ च गुणे जग नूतने।
आदौ हास्ये शरीरे च अध्यात्मनि समुन्नता॥

अतंच्चद्भ्रमे गेहे धुने वर्षे च कुण्डले।
मूर्छायां च यवागौ च नवे सम्यग्विचारणे॥

साधनं मरणे भोगे क्षुधायां चार्थसङ्ग्रहे।
गोबृन्दे गमने वैश्ये सुखे दुःखे शरीरिणि॥

अभिमानश्च सकले ज्ञाने गर्वे तथोन्नतौ।
हुङ्कारे विजने स्नेहे वृद्धौ माने घने धने॥

वेदो वेदे शिवे दैवे दारे च मलये गिरौ।
सन्दष्टने धरण्यां च जले जाले नवेऽखिले॥

जीमूतं पर्वते मेघे रन्ध्रेनद्यां समुन्नतौ।
अयःपिण्डे च शङ्खे च सौन्दर्ये राजसंसदि॥

अर्जुनःपाण्डवे नीले धावलये चन्द्रसूर्ययोः।
वह्नौ ज्ञानिनि पद्मे च वृक्षभेदे शिवे हरौ।
भानुरग्नौ च किरणे चन्द्रे सूर्येऽर्के जले।
धरण्यां यौवने काणे शुकभेकाक्षपत्तिषु॥

कामिनी मन्मथे वारौ भ्रातृपत्न्यां स्त्रियप्रिये।
अपस्मारे गाद्रभे च कलहंसे परात्मनि॥

तनुर्ब्रह्मणि रुद्रे च विष्णौ सूक्ष्मे च पर्वते।
देहे बुद्धौ च पुरुषे तपस्ये चक्रसूर्ययोः॥

निभोऽनिले पर्वते च स्त्रियां राज्ञि शिवे हरौ।
ऐश्वर्ये च जठे धैर्ये मृदुत्वे शत्रुमारणे॥

वनं भये च वाहिन्यां वस्त्रे छत्रावने जले।
सारङ्गे.....सौन्दर्ये तटाके धान्यपूरणे॥

तपस्वी पर्वदाने च वेगे स्थैर्येरिवारणे।
तपस्विनी च युद्धे च जातौ हारिद्रके चरे॥

अनेकार्थप्रदश्शब्द सर्वत्रान्तेषु योजित॥
मदुक्तानि ताः सम्यगादवादिः प्रदर्शिता॥

श्रीमद्विश्वकविर्विरिञ्चिवदन श्रेष्ठासनाधिष्ठिता।
वाणी वाणिजसर्वसूत्रजनित व्याकर्णमाकर्ण्य तम्॥

आलोड्यालोड्य कोशं सकलबुधजनानन्दकंदम्।
चक्रे पद्मनिवासिनी स्वकृपया विश्वैकविश्वाभिदं॥

श्रीमता विश्वकविना सर्वविद्यार्थवेदिना।
विबुधज्ञानसिद्ध्यर्थं प्रथमः काण्ड ईरितः॥

द्वितीयः काण्डः

रत्नं श्रेष्ठे मणौ कोशे लक्ष्ये स्त्रियां जले शुभे।
सर्वे राज्ञि कुले देवे शिरोग्रे दारुभेदने॥

अधीष्ठानं धान्यकोशे वह्नौ न्यग्रोधवेश्मयोः।
बिले ग्रावे पुरे चक्रे नर्तके च विचक्षणे॥

हीनं न्यूनेऽधिके कीर्त्यां हिंसायां परिहासके।
विधाः दुःखे च गङ्गायामुन्नतेन्द्रे खगे विषे॥

लाञ्चनं लक्षणे दोषे नामधेये गुरौ जले।
कीर्त्यां जले च सङ्गे च पार्वणे चन्द्रलाञ्छने॥

विटपः पर्वते स्तम्भे जलानता प्रविस्तरे।
दारा सर्पे च कूर्मे च भेकेऽण्डे च श्रुतौ मणौ।
तल्पः पत्न्यां स्नुषायां च कशिपौ विद्युतिस्त्रियाम्।
प्रौढे दाने तिले दास्यां त्रपायां चाश्वसादिनि।
दम्भोरत्ने गुरामुर्च्छे पिपासायां मधौ दिवि।
वृश्चिके श्वेतविष्टे च नाडयां लाभे निरर्गले॥

शम्भुश्शिवे हरौ शङ्खे वह्नौ मेघे च विद्युतौ।
दीर्घे धरण्यामिन्द्रे च पर्वते परिचारके॥

दुन्दुभिर्दानवे भेर्यां गौर्यां दूषकदोषयोः।
मर्कटे रिपौ..... विष्णौ च चर्मणि॥

गन्धर्वस्थूलनागे च गरुडे पक्षिगानयोः।
कलहंसे च ते बाणे गले खड्गे दुरात्मनि॥

गर्भो गेहे पुराभागे वर्षे मेघे स्त्रियां निधौ।
धरण्यां भार्गवे दैवे गर्भगर्भस्थवारिषु॥

नाभी स्वर्गे शङ्खभेदे वृक्षभेदे विषे जले।
नाभी मृगमदे रन्ध्रे चन्दने मण्डने नवे॥

सुरभिर्गन्धभेदे च फले वेगे बले शुभे।
करिण्यां कामधेनौ च सन्तोषे परिरक्षणे॥

सभा राजसभायां च सत्ये चाब्धौ गुणे जले॥
शिलायामात्मनि क्रोधे पृथिव्यां सरसे निधौ॥

प्लवगस्सूकरे मत्स्ये प्रवाले वानरे विषे।
अपकीर्त्यां पर्वते च संयोगे परिचारके॥

पराक्रमो विक्रमे च नियमे यौवने निधौ।
शक्त्यां कृपायां स्थूले च नाये पण्डितवृक्षयोः॥

विभ्रमे भ्रमणे वेषे विद्यायां सुन्दरे जले।
आशायां चैव कीर्त्यां च विलासे बहुशोभने॥

स्तोमसङ्घे विषे गन्धे प्रसिद्धौ कशिपौ विशि।
मार्दवे मधुरे द्वीपे मन्त्रे स्तोत्रे च बर्हिणौ॥

निन्दायां स्नेहबाहुल्ये भाषायां वेदशास्त्रयोः च।
....श्शात्रौ य वैश्ये च सन्धिन्यग्रोधभूमिषु॥

मनुष्ये पर्वते राज्ञि श्रृगाले कुक्कुटे मठे।
रामे ब्रह्मणि विष्णौ च रम्ये नीरे वरे शिवे॥

स्थविरे तेजसि व्योम्नि रमण्यां राजपुत्रिके॥

श्यामलो नीलेवर्णे सूर्ये शङ्करे मन्त्रिसत्तमे।
मित्रे यौवनमध्यस्थे वर्षे मेघे जले निशि।
भीष्मो भयकरे राज्ञि विक्रमे दृढबन्धने।

बीजे चन्द्रे च सूर्ये च आलस्येन्द्रियपञ्चके॥

गुल्मं गुल्मे च सङ्घे च श्वाने वर्षे गृहे जले।
लोके नाभौ च कूपे च रोमे तीरे पतत्रिषु॥

क्षण: पृथिव्यामाकाशे वृक्षे संरक्षणे क्षुते।
कालभेदे..... मृदुत्वयो:॥

सूक्ष्मश्शक्त्यां वृक्षभेदे विमले सूक्ष्मे वस्तुनि।
अधिके ब्रह्मविद्यायां चन्द्रे सूर्ये परात्मनि॥

वामश्शात्रौ च जाले च सुन्दरे युवतानये।
धारवर्षे पार्श्वदेवे कुटिले वुले जले॥

सारङ्ग: कृष्णसारे च कुरङ्ग सरसीरुहे।
सारथौ ज्ञानसम्पन्नेऽनले भूम्यां शुके गजे॥

पुण्डरीक: पद्मभेदे व्याघ्रे सिंहे च बालके।
इन्द्रे च यज्ञपूर्वे गजे गजसारथौ॥

कृष्णा कृपालौ वार्तायां द्रौपद्यां यादवर्षभे।
नीरे लावण्येपूर्णे च कृष्णसारे परात्मनि॥

बाहब: पर्वते व्योम्नि जयशीले नराधिपे।
हारे बह्मणि विष्णौ गन्धर्वे शशिसूर्ययो:॥

नागारि: षणडवे वज्रे मयूरे नकुले हरौ।
शिवे चक्रे च गरुढे कूलशाबरवायुषु॥

यावीद: काण्डवे चन्द्रे निशायां परिमार्गणे।
अवसाने जले नीले मासभेदे परात्मनि॥

कपोत: पक्षिभेदे च निशीथे मक्षिके घटे।
गन्धर्वभेदे जिज्ञासे ब्रह्मपुत्रे जलाशये॥

सरभे वज्रपाणौ च वृक्षभेदे जगद्गुरौ।
अश्वे देशाव्यवस्थायां सभायां सारथौ निधौ॥

वारिद: पर्वते मेघे नद्यां कूपे विहङ्गमे।
मात्रायां चन्द्रकिरणे गगने कृष्णपादयो:॥

इन्द्र: प्रभायामिन्द्रे च राजसूनौ च सम्पदि।
सर्पभेदे पक्षिभेदे शिवे व्योम्नि..गजसारथौ॥

कर्कोटक: सर्पभेदे दुर्जने वृश्चिके निशि।
अमायां राक्षसे क्लीबे वृक्षभेदे च वानरे॥

शेखर: पर्वते श्रृङ्गे श्रेष्टे मस्तकभूषणे।
निश्चये यशसि व्योम्नि ज्ञानसम्पन्नरुढयो:॥

दुन्दुभिवाद्यभेदे च राक्षसे वैश्यशूद्र्यो:।
पक्षिभेदे च गन्धर्वे सर्पभेदे परात्मनि॥

गजछाया वृक्षभेदे पुण्यकाले च पर्वते।
महिषे राक्षसे क्लीबे कृष्णसारे परात्मनि॥

चन्द्रकी राजपत्न्यां च मयूरे कुक्कुटे जले।
किन्नर्यां च सरस्वत्यां ज्योत्स्नायां बदरीफले॥

कालिङ्ग: सर्पभेदे च नद्यां विष्णौ नलेऽनिले।
मन्त्रज्ञे मन्त्रभेदे च निशीथे शशिसूर्ययो:॥

राजसूय: पर्वते च योगभेदे परात्मनि।
उत्पले विमले व्योम्नि ब्रह्मसूत्रे जगत्पतौ॥

प्रयाग: पुण्यदेशे च नदीतीरे च पर्वते।
अश्वमेधे जगन्नाथे प्रयाणजलवारिषु॥

चित्रकूट: पराश...............।
माने पर्वते भेदे च शैवाले राजदूषके॥

विशालः पक्षिभेदे च धरण्यां दीर्घदारयोः।
वंश्ये भेदे च विस्तारे वस्त्रे भेदे परात्मनि॥

कल्पः कपाले शय्यायां भार्यायां चोपबर्हिणे।
गन्धर्वभेदे गरुढे कृत्रिमे च विषे निशि॥

कल्पः कपर्दिनि व्योम्नि सङ्कल्पे ब्राहमणे धने।
नाशने नारदे शूरे चित्रगुप्ते युगक्षये॥

आरदः कालभेदे च नर्तने गानहर्षयोः।
सरस्वत्यां च मत्स्ये च शकुन्तौ च बृहस्पतौ॥

नारदः पर्वते व्योम्नि देवर्षौ चन्दनद्रुमे।
मेघे नद्यां समुद्रे च कूले भेके बके हरौ॥

कुसुमं कुत्सिपुष्पे च वृक्षभेदे परात्मनि।
प्राविढे बकपङ्क्तौ च प्रासादे च शिवे हरौ॥

पल्लवं मुकुले वेदे पादे किसलयेऽपि च।
मन्दारे कोमले सर्पे प्राङ्गणे देवसारथौ॥

गावल्गणिः कृष्णसारे विदुरे मर्कटे विषे।
गोसङ्गे देवदारौ च धरण्यां रणमूर्धनि॥

मुक्तं मुक्तौ कर्णिकारे त्यक्ते दीर्घतरौ फले।
वेक्रो क्तिके सर्पभेदे च कृतार्थे शशिसूर्ययोः॥

सुरारिर्दानवे यक्षे पिशाचे यमकिङ्करे।
रात्रौ झल्लिरवे क्रूरे भल्लुके मद्यमांसयोः॥

दीर्घसूत्रौ कुक्षिरोगे दीर्घालोचननेत्रयोः।
भूनादे देवभेर्यां च स्वसायां परिमार्गणे॥

मस्तिष्वस्ति पुरोढाशे भागे चन्द्रोदये निशि।
स्वपुच्छे शलभे दीने मक्षिके स्वर्णकारके॥

वायु: काकोदरे मार्गे हिमे च तुरगे मणौ।
वृक्षभेदे च मातङ्गे ब्राह्मणे चन्द्रसूर्ययो:॥

पय: क्षीरे जले व्योम्नि शुभ्रवस्त्रे बके स्वने।
नक्षत्रभेदे कान्तारे चन्द्रे बाल्ये वृषध्वजे॥

क्षीरं जले धरण्यां च मधूरे क्षीरसागरे।
क्षीरे जनन्यामिन्दौ च सज्जने हर्षपोषयो:॥

पात्रं पात्रे खगे व्योम्नि रक्षणे दानकङ्कणे।
आयुधे चार्जवे बाणे छत्रे बाहमणपूजने॥

व्याजो दु:खे च बौद्धे च विषे रोगे कुलालके।
अजक्षीरे कैतवे च कर्दमे बढिशे रवरे॥

पाणिंधम: स्वर्णकारे सव्यहस्ते चिदात्मनि।
वैणवे हर्म्यरन्ध्रे च वाद्यभेदे निशाकरे॥

कुमुदो वानरे धीरे चोत्पले पल्लवे जले।
सन्तोषहीने क्लीबे च मरुभूमौ शवे विषे॥

नीरज: शङ्खभेदे च पद्मे ब्रह्मणि मूषके।
प्रकाशहीने मत्स्ये च युते चान्धे निगर्विणी॥

दानं दाने गजमरवे स्वीकारे चारुविग्रहे।
राक्षसे चायुधग्रस्ते मत्स्यपङ्क्तौ जलाशये॥

माधूको भ्रमरे वाच्येव सन्ते मद्यपायनि।
हिन्ताले तालवृक्षे च गुडे च मधुमक्षिकें॥

भसली कान्तिविस्तारे ज्वालायां शान्तिकाण्डयो:।
नीलमेघे भृङ्गपङ्क्तौ शैवाले चाञ्जने गुरौ॥

वालुकस्वैकतेऽभ्रे च शिलायां दारिते जले।
यन्त्रभेदे मत्स्येभेदे पक्षिभेदे चिदात्मनि॥

सारस्वतो नदीभेदे मुनिभेदे चतुर्मुखे।
सर्पभेदे च वेदे च कोशव्याकर्णसूरिषु॥

दधीचो मुनिभेदे च तक्रे वज्रे महोदधौ।
कुबेरे गोपभुवने गोपाले चन्द्रसूर्ययो:॥

मरुत्वान्मारुते मेघे देवभेदे निशाकरे।
नदीवेगे च गरुडे तुरगे मेघवर्षयो:॥

तरङ्गश्च पले धूर्ते बाणकारण्डवीचिषु।
जालन्धरे च तुरगे ध्वजे लक्ष्म्यां स्वरस्वतौ॥

मातङ्ग: पार्वतीपुत्रे गिरिभेदे मुनीश्वरे।
चण्डाले भ्रमरे जाले मध्यपाये विदूषके॥

सुग्रीवस्सर्पभेदे च शङ्करे हंसनीरयो:।
वीरे चायुधभेदे च पर्वते वा बिसोदरे॥

नन्दन: क्षीरपक्षौ च गन्धर्वे राजमन्दिरे।
वनभेदे च पुत्रे च वाद्यभेदे निशाचरे॥

कामद: पुष्पसङ्के च मन्मथे देववीरुधौ।
कमाधेनौ च राजेन्द्रे भार्यायां देवपुत्रयो:॥

वीरुधो गुल्मभेदे च पर्वते च नदीतटे।
विरुद्धधर्मे चाक्रोशे सेनायां खड्गवादिने॥

मसृणश्चन्द्रकिरणे मार्दवे सुहृदे जले।
नवनीते गन्धभेदे गिरिभेदे परात्मनि॥

खड्ग: खड्गमृगे खड्गे सत्यवादिनि भीषणे।
गरुडे सर्पभेदे च पाषण्डे शशिलाञ्छने॥

सहशं चोपमायां च दशनि मणिबन्धने।
संयोगे सरसि व्याम्नि मन्त्रभेदे च रक्षणे॥

वर्णं वर्णे स्वरुपे च कर्णमूले च वानरे।
चित्रवस्त्रे दृष्टभेदे मर्यादौ शशिसूर्ययोः॥

वातूलो वायुवेगे च रक्ततूले च पेलवे।
पद्मपत्रे च कुमुदे छागभेदे च सन्निधौ॥

तारकः प्लवने दैवे नक्षत्रे राक्षसे करे।
कनीनिकायामिन्द्रे च मुक्ताहारे च सुन्दरे॥

पृथुलः कर्षके शङ्खे विस्तारे दीर्घदारुणि।
भूचक्रे कुचयोः कण्ठे नदीमध्ये दिगम्बरे॥

जामदग्निः परशुरामे नाभिस्थाने.......।
आधारे वैदिकाग्नौ च नदीभेदे गृहाङ्गणे॥

शिञ्जितं ध्वनिभेदे च लज्जात्यागे च मर्दने।
कदम्बे पर्वतोपान्ते स्त्रीजिते कृत्यवस्तुनि॥

गौरीशः शङ्करे राज्ञि मत्स्यभेदे च कोटरे।
वृक्षमूले जातिभेदे रुपभेदे च चत्वरे॥

नैमिशः पक्वहिन्ताले निमिपुत्रे शिवे हरौ।
आरण्यभेदे चाम्पेये रणे पर्वतमूर्धनि॥

अङ्गरागः परीमेधे चन्दने राजपुत्रके।
यौवनस्थे च वीरे च कम्बले च शरीरिणि॥

अङ्गारको राजभेदे ग्रहभेदे चिकित्सके।
वह्नौ गन्धर्वनगरे श्यामले पुत्रिके सुते॥

महिला सुनद्यां च स्त्रियां भूम्यां जलाशयोः।
दुर्गायां राजभार्यायां भेर्यां सेनापरिग्रहे॥

कविश्रृङ्गं हिरण्ये च पाण्डवे चिरजीविनि।
लवङ्गवृक्षे कर्पूरे मेरुश्रृङ्गे गुहान्तरे॥

सचक्षुः पक्षिभेदे च ज्ञानयुक्ते च माधवे।
मन्त्रिभेदे च हृदये मार्दवे बान्धवे जले॥

दमनो वृक्षभेदे च सत्वशुद्धौ जितात्मनि।
गृहमध्ये च केदारे नलपुत्रे चिदात्मनि॥

पार्वणः पर्वसम्बाधे पिण्डदाने निशाकरे।
बाणभेदे ग्रामसीम्नि ब्राह्मणे गिरिगह्वरे॥

धवः पतौ च शैलेन्द्रे धावल्ये पद्मकेसरे।
स्वर्गमार्गे शरण्ये च पण्यग्रे कुचमण्डले॥

पद्मगर्भस्थबके च विष्णौ शक्तित्रये जले।
आदित्ये वज्रपाणौ च सालग्रामे च शीतले॥

भरणं रक्षणे नाभौ गर्भे चाभरणे गिरौ।
भाण्डे गगनगर्भे च सुवर्णे च वृषध्वजे॥

अनेकार्थप्रदश्शब्द स्सर्वत्रान्तेषु योजितः।
मदुक्ता नितरां सम्यगादावादिः प्रदर्शिता॥

श्रीमद्विश्वकर्विर्विरिञ्चिवदनश्रेष्टासनाधिष्ठिता।
वाणी वाणिजसर्वसूत्रजनित व्याकर्णमाकर्णितं॥

आलोडयालोडय कोशं सकलबुधजनानन्दकन्दम्।
चक्रे पद्मनिवासिनी स्वकृपयाविश्वैकविश्वाभिधम्॥

श्रीमता विश्वकविना सर्वविद्यार्थवेदिना।
विबुधज्ञानसिद्धयर्थं द्वितीयः काण्ड ईरितः॥

तृतीयः काण्डः

रत्नं मृदुले मन्दे सदन्तःकरणे जले।
दानशीले समाने च ध्वनिभेदे च सारणे॥

बर्बरो देशभेदे च जातिभेदे निरर्थके।
ग्रन्थभेदे शब्दभेदे गजचर्मणि वालुके॥

पुलिन्दो देशभेदे च जातिभेदे च पाठके।
मित्रघ्ने कर्दमे क्लीबे मार्जने श्वेतकुक्कुटे॥

पक्षः पार्श्वे पक्षपाते ग्रन्थभेदे समीपगे।
पाषण्डे निगले वायौ शिलापाते श्वपाचके॥

कक्षः प्रतापे वैरे च मर्कटे शुष्कवीरुधे।
पार्श्वभेदे निरालम्बे गजमूर्ध्नि महाहवे॥

मञ्जुलः पेशले पुत्रे भागिनेयेऽश्वसारथौ।
ध्वनिभेदे मध्यदेशे वृक्षभेदे च सुन्दरे॥

जानिः पत्न्यां च भेर्यां च तारायां राजवेश्मनि।
गङ्गायां रत्नहारायां विद्यापर्वतवारिषु॥

अङ्गः कपाले वैराङ्गे देशभेदे च निश्चले।
राजभेदे शरीरे च समीपे चन्द्रसूर्ययोः॥

दुर्गं दुर्गे च दुर्गन्धे दुर्गमे च दुरात्मनि।
अरण्ये ब्रह्मणि व्योम्नि गन्धहीने च वारिधौ॥

गन्धवाहे मयूरे च मारुते भ्रमरे गिरौ।
चामरे सूकरे मत्स्ये मद्यभाण्डे च दूषके॥

विचारञ्च सन्तापे विहगे मारुतेऽपि च।
शारदायां च मेघे च विमाने चन्द्रसूर्ययोः॥

केशिनी शक्तिभेदे च शैवाले वीचिरंहसे।
दीर्घकेश्यां नदीभेदे राक्षसस्त्रीप्रवादयोः॥

केकयः पक्षभेदे च देशभेदे च नूपुरे।
राजभेदे च गगने गजमूर्ध्नि श्वपाचके॥

अर्हः शिवं वीतरागे पूज्ये व्याघ्रशिशौ बले।
तिथिदेवालयेऽरण्ये ज्ञानकर्मणि नूतने॥

पञ्चास्यः सिंहभेदे च वायुसूनौ च शङ्करे।
सरस्वत्यां नदीभेदे पिशाचे गिरिगह्वरे॥

प्राणदो ब्रह्मणि व्योम्नि मारुते च जवे घटे।
अन्नदे चैव भार्यायां पुत्रे मेघे च वज्रिणि॥

रुद्रारिस्तारके जीवे मन्मथे मद्यमांसयोः।
वैष्णवे च यमे मार्षे शाकभेदे च गायके॥

अरविन्दः कल्पवृक्षे बीजसंस्थापने निशि।
त्रपायां भार्गवे बाले कूर्मभेदे जनार्दने॥

भूतेशश्शङ्करे वायौ नद्यावर्ते च भेषजे।
वर्षे चौषधीसङ्गे च रुद्रभूमौ जटात्मनि॥

तादः क्रमुकभेदे च शाकभेदे नृपासने।
गर्ते समुद्रप्रान्ते च मत्स्यभेदे शिलातले॥

शोभकृद्वृक्षभेदे च वत्सरे राजगृध्निनि।
वेश्यामुखे मयूरे च ताम्बूले गन्धलेपने॥

लवो· लेशे च विस्तारे राजपुत्रे जवेऽनले।
योगमार्गे कीरसुते कालभेदे परात्मनि॥

शिरीषं वृक्षभेदे च गजबृपृष्ठे मरुस्थले।
पानपात्रे जम्बुके च मार्जने धूतभस्मनि॥

कल्माषिमूषिकायां च राजभेदे निशाकरे।
(पर) मात्मनि च चण्डाले जतुके चोदरे कटे॥

माहिष्मति पट्टणे च शक्तिभेदे निरञ्जने।
महिमायां प्रियालापे नदीभेदे च कानने॥

अशनिर्ग्रहनिर्मुक्ते शक्तिभेदे च वर्मणि।
इन्द्रायुधे निदाघे च शिबिपात्रे समर्धने॥

ज्वालाजिह्वश्चाग्निहोत्रे प्रमथे वनसूकरे।
सुदर्शने च मार्ताण्डे कृष्णसर्पे च दारुणे॥

छन्दो वेदे च गायत्र्यां मानसि ब्रह्मणि ध्रुवे।
गणके पद्मभेदे च नाभिदेशे च कर्दमे॥

कुन्तलो देशभेदे च केशसङ्घे सरीसृपे।
वीरे चायुधभेदे च वृक्षभेदे च कर्मणि॥

जम्भकः पर्वते चित्रे दाम्भिके पल्वलोदके।
पादे प्रमथभेदे च योनिवेशे मरीचिके॥

उन्मज्जनः कपाले च स्नानभेदे च कुक्कुटे।
ग्रामसूकरविस्तारे प्रमथस्तब्धवारिषु॥

सन्तापनो देवभेदे तप्यमाने दवानले।
गर्दभे चायुधे गर्ते कण्टके सूचिभेदने॥

शिवं करे स्नेहमार्गे गौरीचरणपङ्कजे।
किन्नरे तुरगे मांसे मलये पुत्रभार्ययोः॥

कुम्भाण्डः पर्वते राज्ञि नक्षत्रे शशिसूर्ययोः।
गन्धर्वभेदे दैत्ये च मृगभेदे करम्भके॥

हर्यक्षः कङ्कणे दैवे मार्जारे पिङ्गलोचने।
तस्करे वृक्षभेदे च शकुन्ते धर्मनन्दने॥

बिराली गजयोनौ च दास्यां चामीकरे जते।
गौरी चेट्यां चत्वरे च पूजायां वनितासुखे॥

कङ्कोलः पक्षिभेदे च बर्बुरे पङ्कजे जले।
मर्यादसीम्नि सोपाने खट्वायां कानने विषे॥

मत्सरः पर्वताग्रे च सुवर्णे कण्टकारिणे।
गुणभेदे चेन्द्रनीले मायावादिनि कपटे॥

विदर्भो देशभेदे च राजभेदे मरुस्थले।
ललाटे ब्रह्मनिष्टे च वियोगे शिवदूषके॥

शिरोधीः कण्ठदेशे च किरीटे चन्द्रमण्डले।
पद्मरागे प्रवाले च लतागेहे च मार्दवे।

युवनः कृत्रिमे राज्ञि देशभेदे प्रियंवदे।
घृते भोजनपात्रे च वर्षे हर्षे च मङ्गले॥

शैलेयं चन्दने मेघे प्लक्षवृक्षे निशाकरे।
मैनाके रुपभेदे च मधौ धनुषि पञ्जरे॥

गन्धिनी कदलीवृक्षे नदीभेदे च हस्तिनि।
पद्मिन्यां राजभार्यायां कामधेनौ च कामुके॥

शैला नद्यां वृक्षभेदे शैवाले गृध्रमस्तके।
विद्युतौ गिरिसानौ च यन्त्रभेदे च कुट्टिमे॥

फलदा च महादेव्यामूर्मिलायां धनागमे।
खर्जूरवृक्षे काबेर्यां धेनौ च सुरभीतरौ॥

हरिमस्तुरगे नग्ने तालभेदे जनार्दने॥

गन्धर्वभेदे वातकि जम्बीरे कर्दमे फले॥

गुमरागः कामुके च केतक्यां मेघमण्डले।
योगीश्वरे च साधौ च स्वीयामनसि चार्भकि॥

महानादो मेघनादे भेरीनादे च राक्षसि।
ग्रामनिह्वे प्लुते वीणादण्डे चाधारभेदने॥

हुन्तो बाणविशेषे च शार्दूले ग्रामसूकरे।
पिशाचे वञ्चके मूर्खे वृक्षभेदे तिरस्कृतौ॥

चर्वणं पानपात्रे च भक्षणे नर्तकीमुखे।
मधौ फले च कूष्माण्डे मित्रगेहे च कुड्मले॥

गुढा दैर्घ्ये च निद्रायां क्षुधौ तृष्णा जरासु च।
सवत्सधेनौ चिन्तायां नदीवेश्यासुरवासु च॥

वेतन्ती दीर्घपादे च मुनिभेदे निगर्विणि।
वृक्षभेदे मयूरे च नसिकाग्रे चिरन्तने॥

अंशुमान् मुनिभेदे च स्त्रीमुरवे हंसमेघयोः।
चन्द्रे सूर्ये दैत्यभेदे चन्द्रहासे सुदर्शने॥

मणिकन्दः कुक्कुटे च श्रीकृष्णे राममन्दिरे।
बर्हिवाले क्षीरवर्गे मत्स्यभेदे च कामुके॥

अम्बुजश्चातके पद्मे शङ्के दारिद्र्यमोचने।
शरत्काले नाभिदेशे वृक्षभेदे निशाकरे॥

शकुनीकलविंक्कायां देवाविष्टे च भूपतौ।
शाल्मल्यां शुभ्रगन्धे च दीर्घबाहौ च शाश्वते॥

कलकण्ठस्सहस्राक्षे भ्रमरे कोकिलेऽपि च।
वेश्याकण्ठे च वीणायां मधौ च मधुमक्षिके॥

नीवारः सस्यभेदे च सौन्दर्ये गुग्गुले करे।
दासीपुत्रे च शिष्ये च वृक्षभेदे च पक्ष्मणि॥

उत्तमस्सज्जने धैर्ये पुत्रवत्यां निरागसे।
पतिव्रतायामम्बायां सोमसूर्ये जनार्दने॥

कालिका नीलिमायां च मेघपङ्क्तौ निशामुखे।
महादेव्यां च मार्जारे क्रोधायां गजचर्मणि॥

अधिविण्णा निशायां च ज्येष्ठपत्न्यां च शारदि।
अन्तर्वेद्यां स्वधाकारे स्वाहाकारे च मारुतौ॥

घर्षणी क्रोधशीलायां निन्दितायां निरर्थके।
सिहवाले च मार्ताण्डे कृपाणे मत्स्यघातके॥

औशनं भार्गवसुते सामभेदे च भोजने।
कटे पन्नगभेदे च मन्त्रभेदे च चत्वरे॥

अञ्जनं चाङ्गरागे ज लाक्षारसमधूकयो:।
ज्ञानयोगे चञ्चुहास कज्जलप्रीतिवारिषु॥

करम्भो हव्यभेदे च पात्रभेदे मसूरिणि।
वाद्यभेदे केशपाशे पाताले च महोदधौ॥

द्विपो गजे च द्विपे च सूते वह्नौ च पङ्कजे।
व्यञ्जने व्यजने तूले गरुडे चन्द्रसूर्ययो:॥

दन्तशूक: करामृष्टे सस्यभेदे च पन्नगे।
तुषायां गिरिधातौ च मत्कुणे च पतत्रिणौ॥

अद्रीर्णो वमने शौर्ये द्वारे च शशिसूर्ययो:।
गवाक्षे चेधमे शैलगह्वरे परिबन्धिनि॥

उपभृत्पात्रभेदे च किरीटे गिरिमस्तके।
योनिमूले चूचुके च पर्वते परिचारके॥

क्षप: पिशाचे गन्धर्वे क्षुते नीलाम्बरे स्रवे।
उच्चाटने च वैधर्मे धारापात्रे च धूसरे॥

पावो रोगविशेषे च पापात्मनि मराङ्मुखे।
पर्यूषिते चर्मपटे मूत्रे चापानमारुते॥

श्वेत: श्वित्रे श्वेतपुष्पे कुष्टरोगे निशाकरे।
पन्नगे चायुधाग्रे च छटापत्रे च पुष्करे॥

अव्यायनश्च तृप्तौ च वर्षे हर्षे च माधवे।
गुधुपाने च तल्पे च प्रवेशे बन्धुसङ्गमे॥

उपस्थ: स्थविरे योनौ मेढ्रे च गिरिमस्तके।
शङ्खमूले च ढोलायां निग्रहे परिबन्धिनि॥

रोशो धने कुड्मले च कृपाणे वृषणे तृणे।
मयूरवालमूले च देहधीमध्यदेहयो:॥

पुनर्भव: पुत्रभेदेन खरे लोम्नि चाङ्कुरे।
इक्षुखण्डे भोजने च मारुते चन्द्रसूर्ययो:॥

अवलग्नं मध्यभागे लम्बमाने स्तनन्धये।
शिरोभूषणभेदे च पूगभेदे च गोष्पदे॥

नीवी परिवणे ग्रन्थौ स्त्रीणां जघनवाससि।
वेण्यां कुरङ्ग्यां किंनर्यां नंदी भेदे जलाशये॥

मेखला खण्डदण्डे च काञ्च्यां शैलनितम्बिनि।
रज्जौ च मालिकायां च लताभेदे च संसदि॥

प्रार्थना वैन्यवृत्तौ च याच्नायां लतिकागृहे।
अभियाने निवासे च सेवायां प्रभुसन्निधौ॥

साम्परायस्समीपे च विप्लवे गणिकाङ्गणे।
वीरे चोत्तरकाले च निर्गमे गजबन्धने॥

प्रवालो पल्लवे दण्डे विद्रुमे बालपल्लवे।
प्रमाणे चायुधे वीणा..... रत्नछदे जले॥

कलायुश्चाविनिर्यासे सुरभौ लोहिते दले।
औषधे चैव मालिन्ये कर्दमे पल्वलोदके॥

तूलिका कर्णिकारे च कूर्चिका तूलशाय्ययो:।
अर्घे च जीर्णपत्रे च वृक्षभेदे च गर्दभे॥

सटाजटाके सरयो: झटायां सिंहकेसरे।
नदीवेगे तराङ्गिण्यां राजपत्नयां शिलातले॥

हन्तिकक्ष्यश्च सिंहे च शार्दूले चाङ्कुशेऽपि च।
गजबन्धनरज्जौ च वृक्षभेदे चिरायुषि॥

उन्मनी योगभेदे च समुत्कीर्णे च मन्मथे।
सारङ्गा च जपापुष्पे स्त्रीबुद्धौ च विकासने॥

करीष: पङ्कभेदे च वृक्षभेदे च चर्मणि।
पङ्कजे च किरीटे च बाहुमूले निराश्रये॥

तिलकं वृक्षभेदे च तिलके श्रेष्टवस्तुनि।
कुक्षिस्थमांसखण्डे च राजमार्गे च पण्डिते॥

देवरातो राजभेदे बकभेदे च राक्षसे।
मुनिभेदे सिंहे च कवचे च गजाङ्कुशे॥

धर्मो धनुषि धर्मे च यमे कुन्तिसुतेऽपि च।
धीषणे वेणुदण्डे च धर्मशालिनि चार्जवे॥

फालो ललाटे फालाक्षे शाकभेदे च चत्वरे।
नृपे कर्षकदण्डे च कर्मभेदे मृगीगणे॥

नन्दनश्च सुते वीरे गिरिभेदे च मौक्तिके।
विष्ण्वायुधे च दैवज्ञे जले वै नन्दने वने॥

अश्वन्तरी वेगवत्तयामुच्चै: श्रवसि मारुते।
धेनौ च बडबापुत्र्यामरुन्धत्यां पयोरुचौ॥

नारायणी वृक्षभेदे च लक्ष्म्यां गौर्यां च तत्तथा।
नदीप्रवाहे गोपुच्छे महिष्यामाश्रमान्तरे॥

दण्डो यमभटे दण्डे नारिकेले च शिक्षणे।
गन्धर्वभेदे च यमे भेद्रे प्रमथभेदया:॥

भूतसंहरणो वेत्रे गरुडे च हनूमते।
नृसिंहे शङ्करे चैव मृत्यौ च यमदैवते॥

गुलाकुः खदिरे शूर्पे क्रमुके राजवेश्मनि।
महिषीप्रसवे चैव मल्लिकामुकुलेऽनिले॥

रसज्ञास्सरसे भृङ्गे जिह्वायां गन्धकेऽपि च।
बाले यौवनमध्यस्थे पण्डिते च बृहस्पतौ॥

कङ्काधः पक्षिभेदे च शाकभेदे च कुड्मले।
कर्णभारे शरावे च कौस्तुभाङ्कितवक्षसि॥

अनेकार्थप्रदश्शब्दसर्वत्रान्तेषु योजितः।
मदुक्ताः नितरां सम्यगादावादिः प्रदर्शिता॥

श्रीमद्विश्वकविर्विरिञ्चिवदनश्रेष्टासनाधिष्टिता।
वाणी वाणिजसर्वसूत्रजनितव्याकर्णमाकर्ण्य तं
आलोढ्यालोढ्य कोशं सकलबुधजनानन्दनान्दकन्दं
चक्रे पद्मनिवासिनी स्सकृपवर विश्वैकविश्वाभिधम्।

श्रीमता विश्वकविना सर्वशास्त्रार्थववेदिना।
विबुधज्ञानसिद्ध्यर्थं तृतीयः काण्ड ईरितः॥

चतुर्थः काण्डः

शुभमस्तु। अविघ्नमस्तु।
श्रीवाणीपरमानन्दनिधानं पदपङ्कजं।
अज्ञानान्धनिमग्नानां हयग्रीवमुपास्महे॥

मातामहा महाशैलं महस्तदपितामहं।
जगतः कारणं वन्दे कण्ठादुपरि वारणम्॥

कारणं चादिजगतामारणार्थमनागसं।
वारणाननमात्मानमद्वयं समुपास्महे॥

सर्वव्याकरणाम्बोधिं सर्वकोशमहोदधिम्।
विलीदय वाणीजनितकवितानन्दनिर्भर:॥

कविराणमस्तकारोह कौतूहलसमन्वित:।
वीरो विश्वकविर्विश्वकोशं पूर्णं करोतिस:॥

शलश्चले च कुल्यां च मार्जारे चायुधेऽपि च।
शलभे रोगभेदे च मार्ताण्डे गरुडेऽरूणे॥

लक्षणं नाम्नि चिह्ने च सौहार्दे च महार्णवे।
स्नेहकृत्ये स्वरूपे च सौन्दर्ये स्वेदरागयो:॥

धानी निदाने मान्द्ये च नदीभेदनिसर्गयो:।
राज्ञां निवासस्थाने च सस्यभेदे निरागसे॥

रसश्शृङ्गारवीर्यार्चिं सुवर्णेषु विषे वरे।
शुक्रे तिक्ते पारदे च निर्यासे चामृते छानौ॥

तारो मुक्तादिसंशुद्धौ तद्गुणे शुद्धमौक्तिके।
विस्तारे नेत्रमध्ये च नक्षत्रे वानरे घटे॥

प्रभेदस्य मुदस्रावे स्त्रीणां शोणितकर्दमे।
भेदने मरणे वायौ रागद्वेषपरार्तिषु॥

पुण्य: पुण्ये वृक्षभेदे पुण्यात्मनि नलेऽपि च।
तारापतौ सुवर्णे च योगे संपत्प्रवर्धने॥

कन्दुक: स्वर्णपिण्डे च शुक्लनीलेऽरुणेऽपि च।
गन्धर्व भेदे सारङ्गे मृदङ्गमदहस्तिनि॥

मुग्ध: पराशरे कट्यां देवदूते दिगम्बरे।
देशभेदे च विस्तारे श्वानपुच्छेऽम्बरे खगे॥

डिण्डिभो नक्रभेदे च वर्षाकालेऽध्वरौ मुखे।
वाद्यभेदे रक्तमणौ भगे स्वेदे विकत्थने॥

ऊर्मिस्तरङ्गे चान्ने च सिंहव्याघ्रगवीषु च।
कर्णाभरणवातकि चुबुकाग्निषु कानने॥

द्विमुखस्सर्पभेदे च राक्षसे कामरूपिणि।
हर्म्ये पात्रविशेषे च योनौ चान्तर्मुखे मणौ॥

निर्मलं मौक्तिके बाणे सदन्तः करणेऽपि च।
शुकतुण्डे च विप्रे च परब्रह्मणि मारुते॥

मसूरयं हव्य भेदे च रोग भेदे च गद्गदे।
कदलीपुष्पशिखरे व्यञ्जने हारमध्यगे॥

शीघ्रा महिष्यां वार्तायां नदीभेदे प्रमार्जनि।
नारीकट्यां प्रसादे च नेत्रान्ते सूचिहर्षयो॥

क्रतुर्यागे च वीरोग्रे मुनिभेदे वरानने।
देव भेदे कुचाग्रे च मुद्गसूपे च भस्मनि॥

जघनं यागशालायां दुरापे हलफालयोः।
मोक्षणे नीलवस्त्रे च हीने चावयवेऽपि च॥

शाणं गन्धशीलायां च शीक्षे नक्षत्रदीपयोः।
सस्यभेदे च गुल्मे च वीरे चायुघसेनयोः॥

याता देवरभार्यायां श्वश्रूमातुलभार्ययोः।
गृहोदकप्रवाहे च रात्रौ नद्यां महापथि॥

वलभिस्तु गृहाच्छादे विश्वासधर्महर्षयोः।
कङ्कणे देवपूजायां स्त्रीनालो शशिसूर्ययोः॥

नलं राज्ञि विरागे च तृणे पद्मे विलम्बने।
विशोके नौकरज्जौ च श्रोत्रे धम्मिल्लवेषयोः॥

पथिश्रामरदण्डे च जरायां राक्षसस्त्रियाम्।
महिष्यां वर्धमानायां गजविश्रथ चर्मणि॥

पक्ष्मसूत्रादिसूक्ष्मांशे किञ्जल्केन त्रिलोमिनि।
मयूरचर्मे वृक्षाग्रे नीले वीरुधौ॥

चूतश्शूले च वृषभे वृक्षभेदे शरे गवि।
मार्दवे, व रतारूढे योनिमूले च वारुणे॥

खण्ड दुःखाण्डचन्द्रे च समे वीणामुखेऽम्बरे।
अंशे गाने च शर्वर्यां स्त्रीललाटे मृगान्तरे॥

करका वृक्षभेदे च गौर्यां सत्यां घनीपले।
वन्ध्यायां गजवाले च वेण्यां गौरवकन्ययोः॥

सुतः पुत्रे च मित्रे च शिष्ये पात्रे घृते मणौ।
वेदे मन्वन्तरे चार्घ्ये नेत्रमूले च बान्धवे॥

कण्ठो ग्रीवे ग्रामसीम्नि समीपे लेखने पणौ।
फले चात्यन्तसंसर्गे कुलीरे नाविकागृहे॥

संरम्भस्संभ्रमे कोपे युद्धे हर्षे च पाटले।
नकुले वानरे पृष्टे योगे चायुधकार्ययोः॥

रभसो नृत्तभेदे च सूक्ष्माङ्गे वेगहर्षयोः।
कषणे च सुवर्णे च रसे बाणे मृगेऽध्वनि॥

शरभश्शलभे चाष्टौ पदे जावे मृगान्तरे।
शङ्करे दुहितापुत्रे स्त्रीणामाकारदन्तयोः॥

करकस्तु करम्भे च आक्रोशे च कमण्डलौ।
पक्षिभेदे करे मूर्खे चन्द्रेवीरेषु नूपुरे॥

सिद्धिः फले च पूजायां निष्पत्तौ योगहर्षयोः।
घटिकायां तपस्सिद्धौ नदीभेदे च मातरि॥

विशेषोऽवयवे रम्ये द्रष्टव्योऽत्तमवस्तुनि।
गरुडे न्यायशास्त्रे च हारे दर्पणमेघयोः॥

अट्टा चातिशये क्षौमे चान्ने मेखलपट्टयोः।
गजबन्धे शिरस्त्राणे गुणे धनुषि चामरे॥

विमानो देवयाने च सप्तभूमौ च सद्मनि।
दिगम्बरे च निर्लज्जे चीरे च पशुजन्मनि॥

मुक्ता तु मौक्तिके मुक्ते पुंश्चल्यां पायसेऽपिच।
वेकार्क्के च पिप्पलवृक्षे जारस्त्रीनागकन्ययोः॥

वित्ताधिपः कुबेरे च प्रभौ धनिकयक्षयोः।
मेरौ च मेरुशिखरे पुत्रे संसारवारिधौ॥

बीजं फले बीबिकायां प्रतिबिम्बे च मण्डले।
चन्द्रे च दर्पणे चैव योनौ कान्तागृहे मणौ॥

ज्योतिस्ताराग्नि भाज्वाला शरीरि....।
परब्रह्मणि रश्मौ च वायौ देवकी.......॥

पुष्करं करिहस्ताग्रे श्वेतपद्मे मठे जले।
निधौ धनिकतीर्थाभ्यो कङ्कणध्वान भूमिषु॥

नीवीपरिवणे ग्रन्थौ स्त्रीणां जघनवाससि।
अन्तर्वेद्यां वेणिमूले चाक्ष्णोपातविहङ्गयोः॥

यानः पनसवृक्षे च मार्कटे ये च वज्रिणि।
गन्धर्वभेदे च यूनिपुत्रे शास्त्रे च सद्मनि॥

तपोदरश्शिलाभेदे मुनिभेदे शिवार्चके।
वातूलाद्यागमे विप्रे पक्षिभेदे परात्मनि॥

प्रदोषः कालभेदे च पापात्मनि परेऽपि च।
प्लवङ्गपुच्छे कान्तारे वृश्चिके मकरध्वजे॥

जर्जरो देशभेदे च वृक्षभेदे च मारुते।
कीटभेदे नृत्तभेदे ध्वनिभेदे च शाल्मले॥

कस्तूरी च नदीभेदे मान्ये मृगमदेऽपि च।
वृक्षभेदे शिलागर्ते स्त्रीललाटे च चाण्डिके॥

मकराश्व: समुद्रे च वायौ वायुसुतेऽपि च।
वीरराक्षसभेदे च ग्रहमार्गेऽश्वसारथौ॥

उदानो गजभेदे च वायुभेदे च मार्गणे।
विश्वासे दानशीले च नदीतीरे निरञ्जने॥

अम्बरं वृक्षभेदे च शुभ्रवस्त्रे च डिम्भके।
आकाशे मारुतां मार्गे व्यजनोद्यानकेलिषु॥

स्वादु: परिमेले कान्ते मधुरे बान्धवे जले।
सदन्त:करणे मत्स्ये स्त्रीणां मधुरवक्त्रयो:॥

तमलस्तु कुरङ्गे च प्रवाले पेशले मणौ।
पद्मे च पद्मनाले च पद्मिरे पद्मबान्धवे॥

बलि: कवाटे पूजायां राक्षसे चोपहारके।
कीटभेदे च गायत्र्यां यक्षिण्यां राजसन्निधौ॥

तुमुलं शब्दभेदे च डिण्डिभे च निरन्तरे।
आकुले गुणमध्ये च ग्रीष्ममर्यादसीम्निषु॥

कला च कालभेदे च शिल्पलक्ष्मीमुखेऽपि च।
विद्यायां चन्द्रकिरणेहान्ये मागधभूषणे॥

कुशल: पल्लवे क्षेमे पारिप्लवमधूकयो:।
समुद्रयाने पिण्याके तल्पराजविशेषयो:॥

व्यूहस्तु बृन्दे च पुत्रे च विमले चन्द्रसूर्ययो:।
अनले तक्रभेदे च स्वाध्यायजपशीलने॥

ग्राम: कुलाले ग्रामे च वृक्षमूले च पाटले।
शूद्रहस्ते निरालम्बे ब्रह्मयज्ञादिकर्मणि॥

कौलीनं तु विवादे चे युद्ध श्वाने च पक्षिषु।
नाले च गणिकश्रेष्टे सर्पविद्याविशारदे॥

चषक: कन्दुके ध्वाने पानपात्रे च सर्षपे।
नीविग्रन्थौ मधुफले सीमनक्षत्रके बिले॥

कुलाद: स्वर्णकारे च ज्ञातौ प्लक्षफलेऽपि च।
मातुले मातुलसुते सक्थिनिश्वासमैथुने॥

निधावक: काकसङ्गे शस्त्रे मर्मणि भावुके।
दग्धकाष्टे व्याघ्रपुच्छे जाले कुक्कुट मैथुने॥

शाङ्गी कपिश्चित्रकारे शङ्खपुत्रे च वर्मणि।
शाखे काम्बलिके चैव विषपृष्टे च विष्टरे॥

कण्टक: क्रूरचित्ते च कण्टके मर्मघातिनि।
गजश्रृङ्गे गजपतौ श्वभ्रे च गजमैथुने॥

अलीकं मार्गणे क्लीबे व्याजचित्ते शिवालये।
पापे पापात्मनि क्रोधे पन्नगे शुकमैथुने॥

प्रवालश्च प्रमाणे च पल्लवे विण्मयेऽऽर्भके।
नागवल्लीदले शान्ते पद्मरागमणौ स्मृतौ॥

तुरीय्य: क्रोधशीले च वाक्ये गार्दभमैथुने।
चतुर्थपादे वाचाले वृक्षाग्रे ब्रह्मवीरुधौ॥

अपवादश्च निन्दायां मत्स्ये च तिल..तके।
मयूरमैथुने ध्वान्ते चर्मप्रावरणे रणे॥

धुरीक: स्वर्णपात्रे च धुर्यां कूष्माण्डकीलके।
अश्वपुच्छे कुचाग्रे च माने तुरगमैथुने॥

मसूर्स्यं हव्यभेदे च राकाचन्द्रे मरुद्गणे।
रोगभेदेऽश्वसङ्गे च श्मशाने काष्टकीटके॥

वरीवः काण्डमध्ये च तस्करे मर्मघातिनि।
धूर्ते देहमले पिष्टे नदीतीरे मुनौ शिवे॥

बोधः पद्मे परागे च गिरौ च गिरिगह्वरे।
ऋषिभेदे च मार्ताण्डे मत्सरे मसृणे जले॥

सदस्थं सत्सभामध्ये सत्पुत्रे करुणारसे।
चात्वाले चत्वरे वृक्षे प्राग्वंशे देववीरुधौ॥

शाकटायन आम्नाये मुनिभेदे नृपाङ्गणे।
ताल्वास्सम्मेलने तल्पे शालाभेदे वरूधिनि॥

उवानः पर्वताग्रे च भाण्डागारे निशाचरे।
मृत्पिण्डे निह्वपुच्छाग्रे दन्तरोगे च मारुते॥

आर्षेयस्तु वेदे च मुनिपुत्रे नदीतटे।
यवागुपात्रे योगशीले सूत्रे गोत्रेऽन्वये ध्वनौ॥

शाकल्यः कूर्मपृष्टे च मुनिभेदे जनार्दने।
मातामहकुले वारिसन्निधौ गजचर्मणि॥

वृक्षीयः शाकभेदे च मुनिभेदे फले खले।
देवक्षेत्रे देशभेदे क्षणिके पृथुले वने॥

अभिवेदसमाक्रान्ते भार्यान्तरपरिग्रहे।
खेदे मोदे च दृषदि सूते माहिषबन्धने॥

मलदः पापशीले च योनौ वायौ च मैथुने।
पुरभेदे सीमरसंस्थ शिलायां पापचिन्तने॥

पञ्चष्टिकं ग्रहैर्दृष्टलग्ने मर्कटमैथुने।
पञ्चेबाणप्रयाणे च पञ्चकोणाख्यमण्डले॥

करूशः पुरभेदे च पद्मपत्रे च दारुके।
क्रूरे मकरपृष्टे च मयूराक्रोशने विषे॥

वैनाशः स्वर्णहीने च जातिभेदे च वृश्चिके।
त्रयोविंशतिसंज्ञायां क्लेशे कर्कटबन्धने॥

च्यवनः सैकते नीरे मुनिभेदे च मानने।
गजकर्णे खले द्यूते बकसङ्गेऽन्द्रिये विशे॥

मयूरं पुरभेदे च तृणकीटे विधुन्तुदे।
बर्हे च देशभेदे च द्वीपभेदे नृपासने॥

कथाप्रसङ्गो वातूले विषवैद्ये च वाक्पतौ।
इतिहासे च कल्पे च मागधे विप्रगञ्जने॥

सूनुः पुत्रेऽनुजे भानौ कन्दमूले च निष्टिते।
दौहित्रे च सुरश्रेष्ठे नदीवेगेऽङ्कुरे कलौ॥

उदकं चोदकाधारे तटाकादौ समीपगे।
उत्पले वृक्षभेदे च योनिमूले च झर्झरे॥

रिक्षहारी च दायादौ पिण्डदातरि मातुले।
कदर्यां वटबीजे च द्वामुष्यायणकीटयोः॥

कृतान्तश्च यमे धूर्ते शनौ च गिरिगह्वरे।
मारुतेऽशनिपाते च क्रोडदन्तेऽस्त्रसञ्चये॥

रक्षणं धान्यपाते च कोशगेहे च दातरि।
क्षीरे नीरे धरण्यां च राजधर्मे च चक्रिणि॥

सुमनस्कं मनस्सिद्धौ नदीभेदे च वारुणे।
मध्यभेदे च मार्ताण्डे चर्मप्रावरणेऽन्तिके॥

प्रावीः शतह्रादे मन्त्रभेदे दीर्घायुषि प्रिये।
नौकस्तम्भे शिरीषे च रक्तवस्त्राञ्चले ध्वजे॥

वीरवाणी च मार्जाल्यां नदीभेदे च रोदने॥

दने शशकपृष्टे च चर्मरज्जौ महापधि॥

माहेश्वरी च पार्वत्यां शैवपत्न्यां शिवाह्वये।
पिनाके च कुमारे च पञ्चाक्षर्यां निशाकरे॥

सरस्वती जन्तुभेदे शारदायां कलध्वनौ।
आशिष्याशिषसूत्रे च पत्न्यां च चिरसम्पदि॥

अनेकार्यप्रदश्शब्दसर्वत्रान्तेषु योजित:।
मदुक्त नितरां सम्यगादावादि: प्रदर्शिता॥

मदी यमत्यन्तविचक्षणं मतावतन्द्रितं नातरितुं हि वाक्पति:।
अलङ्कृतोऽन्ये विदितावचोदधौ नितान्त कान्तारचरा हि पण्डिता:॥

पुल्लिंगवाचकानां तु पुल्लिंगसंप्रदर्शयते।
तथैवेतरयोस्सम्यक् तत्तल्लिङ्गं निदर्शयेत्॥
श्रीमद्विश्वकविर्विरिञ्चिवदनश्रेष्टासनाधिष्ठिता।
वाणी पाणिजसर्वसूत्रजनितव्याकर्णमाकर्ण्य तम्
आलोड्यालोढय कोशं सकलबुधजनानन्दं जनानन्दकन्दं
चक्रे पद्मनिवासिनी स्वकृपया विश्वैकविश्वाभिदम्।
श्रीमता विश्वकविना सर्वविद्यार्थवेदिना।
विबुधज्ञानसिध्यर्थं चतुर्थ: काण्ड ईरित:॥

पञ्चम: काण्ड:।

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतं।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे॥

प्रैषस्तु छान्दसे चैव मन्त्रप्रेषणकामयो:।
भृत्यवर्गे च कान्तारदासीवासजनेषु च॥

तुम्रा च कन्यकायां च मन्त्रे प्रावरणेऽपि च।
कचे च जगतोदे च नदीनां सङ्गमोदके॥

पत्न्यां सुतायां जायायां सूतचर्यास्त्रिसङ्ग्योः।
पार्वतीरोषसंभूतमार्यां कनकदामनि॥

सामिधेनि हेमभेदे मन्त्रभेदे च कर्मणि।
विशालायां दीर्घिकायां ब्रह्माण्डकुहरे मणौ॥

आश्रुतं मन्त्रभेदे च हेमद्रव्येन्धनेऽपि च।
मायानिर्मितकान्तारे तमक्षीरे च कर्दमे॥

प्रत्याश्रुतं मन्त्रभेदे प्रतिवाक्ये प्रमोषणे।
प्रीतियुक्ते च पाताले वेणीतुण्डे करम्बके॥

आवृजश्वाश्रतमे सोमे व्याहृतो वणिजाङ्गणे।
अश्वतो देश्यपाके च मर्यादातिक्रमे खले॥

पत्नीसंयाजधूके मन्त्रभेदे महापथि।
एकपत्नीव्रतधरे नदीतीरस्थजम्बुके॥

सवाहं ग्रह भेदे च मन्त्र भेदे क्षपात्यये।
तीर्थे वाहनयुक्ते च मन्दिरे भारनिर्भरे॥

अनुवाक्या मन्त्रभेदे वीणावाद्ये च गंहरे।
देवालये च भेर्यां च शिष्यशिक्षाप्रपाठने॥

देवयानं विमाने च यज्ञाभावे शुभावहे।
उत्तरायणकाले च सङ्गमे च महापथि॥

प्रय्यस्तु कालत्रितये त्रिकालज्ञे च शाश्वते।
सङ्ख्यात्रये च नियमे कवितोदे च वर्मणि॥

कालिके ग्रन्थभेदे च वन्यागारे च दुस्तरे।
मार्जालवमने चैव शुनतो देवगीतके॥

ग्रातस्तु ऋत्विग्भेदे च मन्त्रभेदे च मार्गणे।
रात्रौ च कण्ठमालायां क्रव्यादानां प्ररोचने॥

कङ्काण: कालभेदे च पक्षिभेदे नृपाङ्गणे।
वातूलाद्यागमे शर्वे सूत्रे सूत्रार्थकोविदे॥

माहीरं वैद्यभेदे चं मन्त्रभेदे च तस्करे।
वज्रसंयुक्तमालायां कौमारवयसि ध्रुवे॥

वैतन्दीश्शठके चैव मुनिभेदे जनेश्वरे।
वराहतोदेवि प्रशस्ततरवैद्युते॥

दीर्घपादो वृके चैव मुनिभेदे कुरम्बके।
पक्षिभेदे च मार्ताण्डे दीर्घलोचनतत्परे॥

वेदो वेदे च विप्रेन्द्रे मुनिभेदे च राक्षसे।
दर्भग्रन्थौ नदीमध्ये श्लाघनीयगुणात्मनि॥

अधस्तु मुनिभेदे च नरके दुर्गवर्त्मनि।
मयूरमैथुने चैव हरिद्राचूर्णडम्बरे॥

धमाधमे वेणुनादे धमनिध्वनिभेदने।
पार्वतीरोषसम्भूत दूते धूर्तपुरस्सरे॥

ज्वालाजिह्वास्सप्रहस्ते गौरीदूते च कार्मुके।
कृष्णसर्पे खले चैव विषवैद्ये विशां पतौ॥

प्रतर्दनो गौरकादों दुर्गादूते दुरात्मनि।
राक्षसे क्रूरचित्ते च तस्करे गजवीरुधौ॥

भान्दीरो राजभेदे च चर्मनिर्मितवाससि।
वीरे चौषधभेदे च सुवर्णे च सुरालये॥

वैयाघ्रो मुनिभेदे च व्याघ्रमन्त्रविशारदे।
वृक्षभेदे वृकायुद्धे व्याघ्राणां विनिपातने॥

स्कन्धश्रेष्ठे वृक्षमध्ये गिरालापे गजात्मनि।
पाञ्चरात्रयुते पुण्ये शिखरे शिखराग्रके॥

अरिकर्ण: सर्पभेदे कठोरवचसि प्रिये।
मक्षिकानां समूहे च मधूककुसुमे मणौ॥

हरिद्रकोदरे जीवे सर्पभेदे च गौतमे।
विश्वासयुक्तमनसि जीववत्यां च वारिधौ॥

विशालाक्षो माधवे च सर्पभेदे श्वभूमुजे।
मुनिभेदे च चावर्ते कम्बलास्तरकीटके॥

इरापुत्रस्तु भौमे च सर्पभेदे जटात्मनि।
मर्यादहीने शैवाले काञ्चने कटकात्यये॥

शुक्तिकर्णो मौक्तिके च मुनिभेदे च लस्करे।
नागभेदे निशलम्बे कोटरे कोटरान्तरे॥

कम्बल: कम्बले सान्द्रे नीहारविरुतेऽपिच।
काकोदरसमालम्बे मुनिभेदेऽर्भकीटके॥

अश्वातरश्च कान्तारे धान्यागारस्थकीटके।
नागभेदेऽश्वपङ्क्तौ च वाजिमेधे गजासुरे॥

हस्तिर्गजे च कूश्माण्डे सर्पभेदे च वृश्चिके।
रोगभेदे मृणाले च शाकभेदेशरावणे॥

पीठरो रोमभेदे च नागभेदे नराकृतौ।
नारीसमूहे नाट्ये च नारिकेलफलान्तरे॥

पुराणक: पाठके च सर्पभेदे सरोरूजे।
सात्रायणे सहस्राक्षे सन्निधौ साम्परायणे॥

करवीरक आख्याने वृक्षभेदे वरीणगे।
नागभेदे नाव्यभेदे नक्षत्रपथि चोन्नते॥

सुवनास्यो वृक्षभेदे नागभेदे च मारुते।
ऊष्मयुक्तजना चैव इन्द्रियाणां विशोधने॥

दधीवक्त्रः शशाङ्के च सर्प भेदे निरर्गले।
कपिभेदे च वेताले पिशाचोच्छाटनात्मके॥

पिण्डारकः कपोले च मार्जालकलहेऽपि च।
अश्वमार्गे गोकरे च मर्यादपदलाञ्छने॥

करम्बो हव्यभेदे च ग्रन्थभेदे च वीरुधौ।
नृपवाक्यो चोत्कले च भ्रमरीमैथुने सरे॥

शतद्रुश्च नदीभेदे भोजनास्तरणेऽपि च।
भयहीने विचारे च मधूकपरिमार्गणे॥

इरावती नदीभेदे सूर्यपत्यां निशामुखे।
पुरभेदे च कारण्डे कान्तारस्य प्रवेशने॥

विपाशा च नदीभेदे नागकुल्यां विपञ्चके।
दीर्घयष्ट्यग्रनर्तक्यां तस्याश्चैव वदानुगे॥

कल्मषी च नदीभेदे योनिमूले गुदेऽपिच।
अमेध्यपरिचारिण्यां पिशाचग्रस्तवीरुधे॥

पयोष्णे च नदीभेदे स्तनमूले पयोधरे।
गजपुत्र्यां भटाग्रे च सरीसृपभुजान्तरे॥

दाता च पत्यां गौर्यां च नदीभेदे मसूरके।
अन्नप्रदानशीले च देवालयगतार्चके॥

हिरण्यदा नदीभेदे वृक्षभेदे परात्मनि।
पराधीन्यामपामार्गे कुसुमे कुसुमोदरे॥

प्लक्षौ चैव नदीभेदे द्विपभेदे कुशास्तरे।
वृक्षभेदे च सद्भुतौ सन्तानयुवतीगणे॥

चक्षुष्मती नदीभेदे राजमार्गे विशारदे।
प्रभातायां शिरोजाते जन्तुभेदे च कच्छपे॥

तापनीमन्त्रभेदे च नदीभेदे च मारुते।
राक्षस्यां च निशायां च जातग्रामे च सन्निधौ॥

बृहद्रथा नदीभेदे गन्धर्व्यां च शचीपतौ।
सामभेदे मन्त्रभेदे यज्ञपात्रविशेषके॥

वधूसरा नदीभेदे वधूजनपरिग्रहे।
वर्णभेदे जातिभेदे दीर्घिकायां निशाचरे॥

वेण्णी चैव नदीभेदे ग्रामसीमार्गलेऽपि च।
स्त्रीणामुत्सववेलायां निश्यन्ते चैव सामगे॥

कङ्काणवादि नद्यां च नदीभेदे च सन्निधौ।
भेर्यां भेरिनिनादे च वाणिज्यूत्यां प्रयोजके॥

पुष्पवाही नदीभेदे मालिकायां रथान्तरे।
जनार्दने च गोश्रृङ्गे लताभेदे च मारुतौ॥

रथज्योतिनदीभेदे योगिचित्ते विशोधने।
नामभेदे मन्त्रभेदे दिवास्वापनतत्परे॥

उदुम्बरावती कालभेदे नद्यन्तरेऽपि च।
यागे यागीय्यपात्रे च शून्यागारस्थवीरुधौ॥

वेदभा भाग्यशीलायां कल्यां नद्यन्तरेऽपि च।
नदीकूलपैशाच्यां च सरटायां घनात्यये॥

इरावती वृक्षभेदे लताभेदे च ताम्बरे।
ऐरावत सुतायां च नदी भेदे च वल्गुके॥

गृध्रा नद्यन्तरे मार्गे गृध्रायां जल्पनेऽपि च।
हीनवृत्यां पिपासायां क्षपायां नक्रभेदके॥

मही धरण्यां वाराहे दंष्ट्राग्रे श्रेष्टवाचके।
कक्ष्यां नन्द्यन्तरे चैव लताभेदे च वीरुधौ॥

भ्रमरे च लताभेदे वृक्षभेदे च षट्पदे।
नद्यान्तरे च काश्मीरे सीधुपानरतस्त्रियाम्॥

भोजान्तशाकभेदे च देशभेदे च तस्करे।
नद्यान्तरे कपाल्यां चे चन्द्रिकायां शरद्धने॥

पूर्वाभद्रा भद्रकाल्यां शच्यायां च लतान्तरे।
नक्षत्रभेदे कव्यां च नदीभेदे च वालुके॥

शर्मिला राजपुत्र्यां च नदीभेदे लतान्तरे।
देशसञ्चारनिपुणे रथमार्गेऽश्वघातके॥

रामव्रादं क्षेत्रभेदे धनुष्कोट्यां रमामुखे।
देशभेदे वृक्षभेदे गान्धारद्वीपवर्त्मनि॥

कनखालं क्षेत्रभेदे लताभेदे च सागरे।
नद्यन्तरे कृपालौ च उञ्चवृत्तौ जनार्दने॥

कपालमोचनं क्षेत्रभेदे नद्यन्तरेऽपि च।

क्रियाभेदे च वक्राङ्गे पण्यस्त्रीलोलुपे खले॥

चान्द्रावटं नदीभेदे तीर्थभेदे लतान्तरे।
नक्षत्रमार्गे नक्रे च शक्रायुधपरिग्रहे॥

सुवर्णक्षेत्रभेदे च नदीभेदे जलायुते।
हिरण्यःसूक्ष्मवर्णे च वर्णभेदकरूपिणि॥

विरन्धरो मयूररे च नदीभेदे च खल्वरे।
व्याघ्रयुद्धे च खड्गे च चर्मप्रावरणे विषे॥

बिन्दुश्च बिन्दा वेश्मान्ते तीर्थभेदे दरीमुखे।
ग्रैवेये च शरावे च वायुमार्गे विशारदे॥

भद्रपूर्वा राजमार्गे नदीनां सङ्गमोदके।
नक्षत्रभेदे कान्तारे गीते मङ्गलकेतरौ॥

मरुपूर्वनदीभेदे देवेन्द्रे च शरासने।
नक्रे ध्वजसमूहे च वीरे पालाशवीरुधौ॥

मलीमान् वायुपुत्रे च बिले स्वर्णविशोधने।
नक्षत्रमध्ये गगनध्वनौ नारे च मन्मथे॥

विगरः पर्वते काले वायुभक्षणतत्परे।
वस्त्रहीने च धूर्ते च मूर्खचित्तविशोधने॥

कलिकुरो लताभेदे वृक्षमूलफलेऽपि च।
बडीशो चर्मकारे च मुनिवेषमुनीश्वरे॥

वरको द्रव्यभेदे च वृक्षभेदे च दारुणे।
लताभेदे च वैद्ये च शरीरपरिबन्धने॥

वानूमर सजातीये वीरे वीरतरेऽपि च।
मस्करे घटसन्धाने कारके गृह्यमेधिनि॥

तालुश्च वामनेत्रान्ते जलपात्रे च जालके।
अगभेदे स्वल्पतमे काले च विनिवारणे॥

मध्वीषकस्तु वातूले ग्रन्थभेदे परात्मनि।
योगनिष्ठाप्रवीणे च व्यावहाश्युताङ्गणे॥

ग्राहकश्शरवेगे च दौहित्रे च मरुत्पधि।
गजपुष्टे कराले च शिष्ये वाचकनिवृतौ॥

दशान्नं द्रव्यभेदे च मन्त्रभेदे च वणिकि।
समुद्रयानलाभे च सर्ववस्तुपरिग्रहे॥

श(च)बलो यमदूते च विष्णुदूते च पर्वते।
ललिता मोहने चन्द्रे कामधेनुसुते वरे॥

तन्नकस्तु शिरीषे च शिरीषकुसुमेऽपि च।
द्यौभूतशिशौ नारी वाक्यान्तरविमोहने॥

विचक: कल्पभेदे च विश्राणनपराङ्मुखे।
खर्जूरवृक्षे वकुले वल्मीकाग्रसरीसृपे॥

आम्नातश्शिक्षणे व्योमे सेनामुखपरिग्रहे।
कल्याणगुणसम्पन्ने बीजे वनविहारणे॥

चर्मतो दानशीले च स्वर्णकारगुहाशियो।
सन्तानदक्षे कामे च तिर्यञ्चोऽर्ध्वप्रसारणे॥

श्रीमता विश्वकविना सर्व ज्ञेन महात्मना
विबुधज्ञानसिद्धयर्थं पञ्चम: काण्ड ईरित:॥

षष्टम:काण्ड:

अक्रीधो धर्मपुत्रे च शान्तचित्ते च कर्पटे।
कान्ते चौषधभेदे च योगयुक्ते च सद्मनि॥

मन्यु: तमसि कान्तारे राक्षसे कामरूपिणि।
कोपे कोपनशीले च ब्रह्माण्डकुहरे विषे॥

भेषजी वैद्यभार्यायां विद्याभेदे मनोहरे।
वैन्ये विषलतायां च वाजिवाले धनाधिके॥

प्रभर: कार्तवीर्ये च पय: पूरखलोदरे।
शिवे महामहे कार्त्स्न्ये प्रभुसिंहासनेऽर्पणे॥

शर्मसद्वृग्रभेदे च मक्षिकाक्रान्तवीरुधे।
परिवादपरे माषभक्ष्ये खलनिपातने॥

पृष्टस्तु पुष्टिकामे च मत्स्यलेशे जनार्दने।
कारण्डके च हंसे च बकभेदे च गुग्गुले॥

आलातुरस्तु हर्म्ये च सिद्धान्ने चक्रवर्त्मनि।
आनन्दभरिते योगे योगीन्द्रे योगमार्गिणे॥

उतन: पक्षिभेदे च शङ्करे शशिमद्दले।
हेमभेदे प्रभामध्ये प्रजासंरक्षणे जले॥

रयोष्णे च नदीभेदे कर्मभेदे वशीकरे।
शिरस्त्राणे च चार्वाणि मृदुकार्पासपट्टके॥

करूशो देशभेदे च राजभेदे शिवार्चके।
वैङ्गे विषधरे चैव प्रजापालनतत्परे॥

माहिष्मती पुरीभेदे विद्याभेदे च मातरि।
इन्द्रजाले प्रियाभागे पार्वत्यां पापनाशने॥

हिरण्यदा धरण्यां च सद्विद्यायां पयोनिधौ।
विचारहीनवृत्तौ च जातिभेदे स्त्रियामपि॥

गानं वेणुविशेषे च विज्ञानजलशौर्ययो:।
गाने कर्मविपाके च पक्षिचन्द्राम्रवारिषु॥

भल्लूको बदरीवृक्षे गमने विभवेऽपि च।
जन्तुभेदे क्रियाभेदे जातकर्मप्रशंसने॥

विभवो मोक्षमार्गे च व्याहारपरिशीलने।

लैङ्गे लिङ्गपुराणे च नदीमध्यस्थपादपे॥
केद्रस्तु दशमे चेन्द्रे सप्तमे चैक एव च।
चतुष्के चञ्चरीमार्गे संयुक्तधनगर्विते॥

विकोल: पक्षिभेदे च वृक्षभेदे च चत्वरे।
मर्यादहीने नेत्रान्ते नाचारम्भपरिग्रहे॥

कपोलशाखाविस्तारे मांसे वीरुधान्तरे।
मर्यादहीने चाम्पेये सरटायां वधूजने॥

कूर्चिका चुबुके वस्त्रग्रन्थौ पद्मस्थवारिणि।
सिंहिका पात्रभेदे च वीर्यासे च शिवालये॥

विभरो पिञ्छभेदे च शर्यादिसदनेऽपि च।
सीमन्तिनीसमूहे च विपर्यासशरीरिणि॥
'झरो झरि' सुसूत्रे च नदभेदे च नर्तने।
श्रृङ्गारसमयातीतशोभने वृश्चिकालये॥

पुष्पालको सूर्यभेदे मृगभेदे च पर्वते।
उद्दालकसुते चैव गोकर्णे शिखरालये॥

तृटको लेशभेदे च हीनजातिनिषेवणे।
प्रमदागलिते चैव वल्मीककुहरे शठे॥

निर्गन्धकः पुण्यहीने वृक्षभेदे च चर्मणि।
कान्तारमध्यकूटे च विश्वासपरिशोधने॥

त्रोटको मुनिभेदे च प्रादुर्भावे च यौवने।
चञ्चौ विपाक कबलविन्यासे च शरद्वने॥

विधूकं मृगभेदे च झिल्लिकागणनादिते।
विशाले लोध्रकुसुमे सीमन्तकरणे रणे॥

वेदसाधुः पताके च विशीर्णकरणेऽपि च।
मालिकाश्लथने गौरीपादसञ्चारपर्वते॥
कृषितं जन्तुभेदे च शिलाभेदे शराद।
निर्विन्ध्यापादपे च गजानां बन्धुघर्षणे॥

माण्डालकं रोगभेदे बिम्बे च शशिलाञ्छने।
राहुपुत्रे च जघने शिलावर्षे शिलामुखे॥

कुरुम्बका नदीमध्ये कुमुद्वत्यां शिलान्तरे।
पनसस्य प्रभेदे च वनवासनिवारणे॥

सुप्रतीको मणिश्रेष्ठे शोभनाङ्गे च शूलिनि।
गजभेदे च गर्वे च गङ्गाकूलविलुण्ठने॥

राधन्तरो सामभेदे मन्त्रभेदे च मागधे।
इहलोके च चक्रे च युद्धरङ्गे च कारुणि॥

काव्यस्तु सरसामोदे मन्त्रभेदे प्रपादके।
विश्वासभेदे कूपस्थजन्तौ जगदुपद्रवे॥

कूल्यस्तु मन्त्रभेदे च मुनिभेदे प्रलोभने।
विन्वासहीने सामन्ते वृक्षभेदे च पर्वते॥

विकरश्चोपभेदे च मन्त्रभेदे च नैष्ठुरे।
मातुलद्यागमे प्रोक्तसूचिभेदे जनार्दने॥

अवटो गर्तभेदे च मुनिभेदे निरामये।
जन्तुभेदे क्रियाभेदे जनार्दननिषेवणे॥

रवन्यस्तु जन्तुभेदे च मन्त्रभेदे मरुद्वने।
गर्तप्रारम्भसमये नरके विनिपातने॥

हृद्यस्तु पद्मे मत्स्ये च मन्त्रभेदे निरन्तरे।
हृद्यवस्तुनि पद्मे मत्स्ये च मन्त्रभेदे निरन्तरे।
हृद्यवस्तुनि चैत्रे च मन्दारकुसुमे जले॥

सूद्यस्तु मन्त्रभेदे च सूचके सूचिभेदने।
दीर्घपादे शर्यातौ विश्वासपरिमार्गणे॥

वैतण्डी शाकभेदे च विद्याहीने निरर्थके।
मुनिभेदे च विस्तारे मन्त्रपूते च वल्गुनि॥
चत्वालो देशभेदे च क्रियाभेदे च क्रूत्विजे।

मन्त्रभेदे च कारण्डे दीर्घायुषि हिमालये॥
धिष्णेयुस्तुहिनांशे च मन्त्रे मन्त्रपुटेऽपि च।
यागीय्य देशभेदे च निरामयशरीरिणी॥

सयोनिश्शाक भेदे च देवेन्द्रे मन्त्रपूरणे।
भार्यासान्निध्यदेशे च क्रमुकाभेदनाशने॥

विशिर्ष्णे तु चरण्ड्यां च केशपाशविमोचने।
देवभेदे च आम्नाते मन्त्रभेदे रमापतौ॥
गृघ्र शीर्ष्णेर्मन्त्रभेदे वृक्षाग्रे पद्मकेसरे।

कुलायभेदे वणाग्रे पर्णमूले च वीरुधौ।
पुष्पवान् मालिकाकारे सूर्ये सूर्याग्निलोचने।
चैत्रमासे वसन्ते च जारचोरप्रवीणके॥

अग्निमान् सूर्यभेदे च मन्त्रभेदे च शङ्करे।
तीर्थे दारुविशेषे च ब्राह्मणे दर्भसंस्थरे॥

पशुमान् राजभेदे च देशभेदे गवाङ्गणे।
सन्तानवृद्धिसंयुक्ते यामे वरुणसन्ततौ॥

रयमान् पुष्णिदे वीर्ये पाषाणतलवासिनि।
विस्तारधनसंयुक्तौ गृहगेहपतौ धुरे॥

वृष्टिमान् पीनदेहे च राजभेदे परात्परे।
सूर्यालोकनमार्गे च वृक्षभेदे च कर्दमे॥

श्रीमान् लक्ष्मीपतौ बाल्य, यौवनस्थे च सद्मनि।
राजसिंहे च सद्वृत्तौ वधूटीमुखपङ्कजे।
प्रजावान् वृक्षभेदे च बहुसन्तानसंयुते॥

दक्षप्रजापतौ राज्ञे कश्यपब्रह्मणेश्वरे।
कोशवान् वैश्रवरे जहनौ पुस्तकापुटिकेऽपि च।

भाण्डागारद्वारपाले खड्गधारणतत्परे॥

मतिमान् मतियुक्ते च भाविकार्यविशारदे।
दैन्ये वायुसुते चैव कृमिभेदे च सविणि॥

बुद्धिमान् गीष्पतौ श्रेष्ठवस्तुज्ञानविशारदे।
तात्कालिका लोचनाया: तत्परे च सुहृद्गणे।
प्रज्ञावान् शक्रसूनौ च त्रैकालिकविशारदे॥
उद्धवे चोन्नतस्थे च बहुभाषाविशारदे।

प्रति भावान् खौ चन्द्रे चाग्निवीरे च तस्करे।
उन्मेषशालिचित्ते च मर्यादरणे सतौ॥

मर्यादवान् भूमिभेदे समुद्रे राजशासने।
वैवस्वते च मार्ताण्डे नीतिमार्गविशारदे॥

विद्यावान् ज्ञानचित्ते च नैषधे नमुषात्मजे।
विद्यासंयुक्तवदने ग्रहसञ्चारवेदिनि।

बलवान् भीमसेने वायौ ज्ञानविशारदे।
कार्तवीर्ये च नहुषे विरुधे विरुधान्तरे॥

चणक: सूपभेदे च सर्पभेदे च मारुतौ।
चोखीरसमूहे च योगविद्याविशारदे॥

फणिकस्तु शरावे च पक्षिभेदे च शाश्वते।
वासनावासिते प्रोते प्रवासरतमानसे॥

रकिट: चित्तविभ्रंशे तरुभेदे च कण्टके।
किराते नीचसेवायां कृषिकीटे चरीमुखे॥

वाटको सीमभेदे च पलायनपरेऽपि च।
वशीकरणमन्त्रे च शिलाभङ्गे च कर्दमे॥

अनीतो मुनिभेदे च वृक्षपङ्क्ततौ परत्मनि।
योगभेदे चौर्यभेदे विद्याधनविगर्हिते॥

वर्धूषिको वैश्यभेदे वैश्यवृत्तौ वणिक्पथे।
सङ्करे च करूसे च गजमार्गविशारदे॥

पलूगक: पक्षिभेदे वाग्वारविशारदे।
वरूधिनि मुखै चैव शैले कनककन्दुके॥
यमिताक्ष: कशाघाते योगविद्याविशारदे।
कान्तारदेशसञ्चारशीले यन्त्रविशारदे॥

मधूणो मक्षिकाघ्राणे मधुसेवाविशारदे।
ऋतुभेदे यागभेदे मृदुवाक्यविशारदे॥

भाण्डीरो राजभेदे च देशभेदे दयापरे।
परस्परसमायोगे यन्त्रविद्याविशारदे॥

चमस: पात्रभेदे च यागदेशप्रवेशने।
मन्त्रभेदे च वातूले गानभेदे च नर्तने।
महीधरो व्याघ्रयुद्धे राजभेदे च कच्छपे।
वैरे वराहदंष्ट्राग्रे विस्कुलिङ्गे च गंहरे॥

सयावक: परामोदे हव्यभेदे च रिखणे।
शून्यागारनिवासे च धान्यभेदे प्रपूरणे॥

धूतको द्रुमभेदे च परीहासविशारदे।
ऋषिभेदे च निर्वाणे ग्रामकुक्कुटसङ्गरे॥
वनीवधु: शत्रुघाते नेत्रसञ्चारनैपुणे।
वधुगृहप्रदेशो च वने ताम्बूलचर्वणे॥

तमर: पक्ष्मसञ्चारे तैलभाण्डे च षड्पदे।
कालवाचालशैलाम्बु कटवादित्रवाजिषु॥
वरूदको मधूके च माने यौवनकङ्कटे।
वैद्यभेदे च वातूले पातालतलगह्वरे॥

कारीमरुः पक्षिभेदे शैवालनिचयेऽपि च।
मले कर्दमभेदे च कीटभेदे च मायिनि॥
धनुषो मन्त्रभेदे च दारुभेदे शिवालये।
शिलाप्रदारुणे काको मक्षिकापालके मणौ॥

त्रिगर्तो राजभेदे च द्विपभेदे मयालये।
अग्नित्रयनिवासे च युद्धमार्गविशारदे॥

सौकातिकं महायोगपीठमङ्गलसूत्रयोः।
विशालनेत्रसंयुक्तजालसंचारवर्त्मनि॥

उमार्कस्तु महीपालभेदे सूर्योदयेऽपि च।
सूर्यास्तमयकाले च गानविद्याविशारदे॥

सन्दर्शिको नारदे च केतके पायनान्तरे।
वृक्षभेदे शाकभेदे कीटभेदे च संसदि॥

वासन्तिके वसन्ते च वसन्तागमनेऽपि च।
सीमान्तिनीसमूहे च दुर्गायां वनवीरुधौ॥

कृपारवो महेन्द्र च मार्तण्डगमनेऽपिच।
मन्त्रभेदे च मातङ्गे मतङ्गस्य निवेशने॥

पद्मा लक्ष्म्यां सरस्वत्यां गौर्यां वातायनेऽपि च।
राज्पत्न्यां कुरङ्ग्यां च ब्रह्मविद्याप्रवर्तने॥

श्रीमता विश्वकविना सर्वज्ञानमहात्मना।
बिबुधज्ञानसिद्ध्यर्थषष्टमः काण्ड ईरितः॥

सप्तमः काण्डः

अघाटी धातुवादे च दाहने च मृगान्तरे।
गजविस्त्रम्भमार्गे च बलाहकविमर्दने॥

चिचिको यूपभेदे च द्रव्यभेदे च मारिषे।
चिकत्सके च वीपायां पक्षिभेदे च मारुते॥

नाव्यस्तु सूर्यरश्मौ च रज्जुभेदे च मस्करे।
कोटरी कीटभेदे च मर्यादविनिवर्तने॥

मन्दपालो देवदूतभेदे शशकपालके।
पार्वती दूतभेदे च कृमिभेदे मुनीश्वरे॥

वास्तुको वास्तुपुरुषे वस्तुप्राधान्य एव च।
गरे चौषधभेदे च प्रमार्जनविलुण्ठयो:॥

नेमिकारो वृश्चिके च शिल्पभेदे च कङ्कणे।
क्रव्यादरोदने चैव क्रतुमार्गविशारदे॥

चान्दूको देवभेदे च मुनिभेदे मरुत्पते।
बकभेदे शरद्दतौ विशालप्रस्तरे जले।

महान्धको मूषके च नकुले कुलटामुखे।
वराहभेदे वार्तीक्ये शिक्ये शिक्यसमावृते॥

वृन्तामलो देवदूतभेदे पांसुनिवारणे।
पार्वती शेषसंभूतदूते समरभञ्जने॥

रक्तीमुखस्तु शरभे गौरीतपसि चञ्चले।
शावकभेदे च यूपाग्रे केशेरुप्रे विलोढने॥

विस्तारको दिवाभागे भागभेदे मृगान्तरे।
कारुण्यकमनीय्ये च पतिसङ्गे दिशां पतौ।
बिन्दुमाली मन्त्रभेदे मूखरे राक्षसान्तरे।
धरण्यां च विशालायां दीर्घिकाकूलभेदने॥

मसृण्वन: कपोते च जलजान्ताविसारिणि।
कात्यायनी पुत्रभेदे मृदुमार्गप्रवर्तके॥
वलीसङ्ग: कशाग्रे च वानरीसङ्गमेऽपि च।
वल्मीकमूले कपटे कमलाचारवर्त्मनि॥

मूखरो मृत्तिकाभेदे मूके च बधिरेऽपि च।

दैत्यान्तरे विपाके च वारिवारणमस्तके॥
शिबिवान् कामुकाचारे गृहनिर्माणकेऽपि च।
वाद्यकारे वशीकारपावके गोष्पदान्तरे॥

देवश्रुतो नारदे च वेदे शास्त्रे च पाठके।
हेमद्रव्यविभेदे च राजभेदे परामृते॥

असूरकोशं भुधूते सामभेदे च शाश्वते।
विश्वासहीने पाषण्डे राजन्य परिचारके॥

प्रगायको मागधे च ऋत्विग्भेदे मृगान्तरे।
वैद्ये वैणिवदण्डे च गजे च गजसारथौ॥

परित्रितिष्ठितं वन्यमूले रोगान्तरेऽपि च।
ध्रुवे च ध्रुवलोके च पुरोडाशान्तरे मुखे॥

सवनः क्रतुमध्ये च मन्त्रभेदे मरुद्गणे।
यागीय्यसामकाले च वेदविद्याविशारदे॥

प्रवासको योगभेदे युद्धभेदे च शाश्वते।
वानप्रस्थे च सङ्गे च जातकर्मणि नामके॥

सन्ध्यर्थः सन्धिकार्ये च संयुक्ते चापराजिते।
दूतकार्ये विषाग्रे च कुमारे च विलुम्पने॥

संसारः प्रस्त्रवे व्योम्नि जनने जातकेऽपि च।
नित्यकर्मप्रभेदे च अश्वे च बलिबन्धने॥

समगो नाट्यशालायां नाट्यं भेदे च रामणौ।
सरले चैव पाताले सम भूमौ वृषध्वजे॥

भूतिगश्शङ्करे व्योम्नि कुबेरे च कुलुत्थके।
आज्ये मध्वन्तरे चैव विपाकगतभोजने॥

प्रस्तूकस्तु तुलाभेदे प्रस्तुते च प्रजापतौ।
नाम्नि वस्त्वन्तरे मार्गशोभने च परिप्लवे॥

निर्माणगश्शिल्पकारे विश्वकर्मणि धातरि।
जनके च जनन्यां च राजवर्त्मनि शाबके॥

दशगो योगविस्तारे योगसुव्यक्तचेतसि।
जितेन्द्रिये च पुत्रे च सेवके च विशां पतौ॥

भूतिकामस्तु राजन्यमन्त्रिश्रेष्ठे बृहस्पतौ।
शरत्कालघने चैव सत्ये सत्यविशोघने॥

कालवृत्तौ घटे देहे देहस्थमलमूत्रयोः।
आयुषः परिमाणे च शक्रजे शक्रमूर्धनि॥

विज्ञानपादो योगीन्द्रे सत्यधर्मपरायणे।
गुरौ गुरुसुते चैव ब्राह्मणे च परात्मनि॥

योगदो गुरुभेदे च मसून्ये चोत्पलान्तिके।
नेत्रमध्ये च योगीन्द्रे ग्रन्थभेदे जनार्दने॥

वीरको देशभेदे च भाषाभेदे चमत्कृतौ।
उलूकांडे च कमठे वीरसेनापरिग्रहे॥

कोणस्तु देशभेदे च द्रव्यभेदे च रिखणे।
नाम्नि वस्त्रस्य विभेदे वस्त्रविश्लथने खले॥

अभीरकः कुशाग्रे च देशभेदे च चत्वरे।
किरातभेदे यूते च दरिद्रपरिसेवने॥

शम्भुको गृहवारे च पूरणे राक्षसान्तरे।
समाजे विभवे चैव तूलराशौ च गुग्गुले॥

प्रक्षाणो वेदभेदे च कार्यान्तरसमागमे।
प्रज्ञाविशारदे चैव महापर्वतमूर्धनि॥

यवीय्यको याङ्यनके कनिष्ठे च कनीनिके।
चलने चैव कल्याणे भयदे वीरुधान्तरे॥

स्वामिकराजभार्यायां निलीकायां क्षुतावपि।
देवमार्गप्रचारे च विश्वासे जलनायके॥

विशीलो कामसञ्चारे मधौ च मधुपस्वनौ
राजभेदे चित्तहीने मन्त्रसंस्कारवर्जिते॥

बदरी चैव शोभायां नित्यकर्मरतेऽपि च।
जात्यन्तरसमायोगे कलशे चैव धातरि॥

चराहुकस्तु शैलेन्द्रे स्थूलरज्जौ सुहृद्गणे।
रथे गजे च कारुण्ये विश्वासे च विशां पतौ॥

श्रृगालवारिवाहे च चतुष्पदसमीरयोः।
खगे बाणे धरण्यां च भेकेन्द्रगरुडे......

कथिकस्सूतपुत्रे च पुराणपठनेऽपि च।
वत्सरे घटिकार्थे च सूते पापविशोधने॥

पलोलो वृक्षभेदे च पटले पाटलेऽपि च।
गजबन्धनदारौ च गरुडे श्वेतनीलयोः॥

रक्तमाधूक आशान्ते कृमिभेदे च वारिधौ।
वेशे रक्तेक्षुकाण्डे च मृणालादौ प्ररोहणे॥

सुग्रीवः पन्नगेंद्रे च मक्षिकाण्डे जलाशये।
हृदये ग्रीवमध्ये च वज्रपाणौ सुहृन्मुखे॥

रामदः पुष्पजातौ च कन्यादातरि मातरि।
वृक्षभेदे पक्षिभेदे गुरुवाक्यविशोधके॥

वरन्धको यमे वायौ नीहारे च सरीसृपे।
मर्यादावर्तने चैव कबले कबलान्तरे॥

तिक्तवारो मन्दवारे तैलाम्बुनिषेवणे।
द्विरेभमैथुने चैव पिशाचग्रस्तचेतसि॥

चक्रीट: कण्डकाक्रान्त वीरुधे मकरान्तरे।
विषवैद्ये निशानाथे गर्विते च गवाङ्गणे॥

ललाटिकस्तु तिलके राजभावप्रदर्शनि।
अलङ्कारविशेषे च कमनीयजटाधरे॥

मेरट: पाकभेदे च कृमिभेदे च कज्जले।
विशिप्रसूने मूले च वेदिकालङ्कृतौ गजे॥

राधको रूढयन्त्रे च शीतले च मनोपटे।
शिष्ये विषाणकोणे च वने च मलिनाम्बरे॥

भकुटो मत्स्यभेदे च भयङ्करसमागमे।
नेत्रोन्मीलनवेलायां चालने च सरीसृपे।
वस्त्रभेदे वसन्ते च मसूरगृहशावके॥

सुस्पष्टस्तु निशान्ते च संशुद्धतरवर्त्मनि।
वेदान्तग्रन्थभेदे च देवालयबिलान्तरे॥

पाञ्चालिका तु द्रौपद्यां रीतिभेदे च संस्कृते।
विरुद्धमार्गे दैत्येन्द्रे कामधेनौ च काञ्चने॥

सुपर: कनकाक्षिमवस्त्रमर्यादहारयो:।
वरे गोपुरे मन्दे ग्रन्थिभेदे च शाश्वते॥

कुटीचकस्तु सन्यासिभेदे कुटिलवर्त्मनि।
रोगभेदे पक्षिभेदे मृगभेदे च गार्दभे॥

विषीणको देवघाते नदीतीरे महेश्वरे।
शृङ्गहीने च विन्यासक्रमणे दारुनिर्मिते॥

व्यङ्गारयो वायुमार्गेसञ्चारिणि पलायने।

श्रीरपाने च वातूले गर्भान्धे च निपातने॥

नूतनारो मन्त्रभेदे ध्वनिभेदे च गर्दभे।
कामक्रोधविहीने च वातान्तरनिवारणे॥

भूणको राजभेदे च गौरीदूते च मार्गणे।
सिंहस्थाने च कारण्डे मृदङ्गे विषभोजने॥

वनिकारो गयाक्षेत्रे निदासे च सरीसृपे।
मयूराण्डे कुक्कुटे च गन्धद्रव्ये निषेवणे॥

वैशाणस्तु शिलाभेदे वीरे चैव मतान्तरे।
ग्रन्थभेदे जगत्सूत्रे वणिजामुखमारुते॥

कमनो यामले चैव वीरे वायुनिरोधने।
सहस्रारास्थितज्योत्स्ना सेवने यवनेऽर्थके॥

विशीर्णदो विहङ्गे च मार्ताण्डभ्रमणेऽपि च।
विशालनेत्रे माधूके रये देशविलासने॥

द्रोणटः क्रतुभेदे च जन्तुभेदे जगद्गुरौ।
वायुसंस्पृष्टगर्भादिभोजने विषवीरुधे॥

सुदर्शनो लोहयन्त्रे पालाशकुसुमेऽपि च।
पक्षिभेदे च हैमन्ते नक्षत्रे च वशीकरे॥

परिष्टः सामभेदे च सीधुपाने च सङ्गरे।
वैद्ये च परिचर्यायां विषहारिणि मस्तके॥

वातूलः कपर्दे च देवतावाचकेऽपि च।
शिष्यदत्ते च गान्धर्व विद्यागानविशारदे॥

खम्बुरीटः पक्षिभेदे मृगभेदे चिरायुषि।
दैत्यभेदे च यू पे च यूपाग्रे च शिलीमुखे॥

जारचोरो जारपुत्रे दासिपुत्रे सिताम्बरे।
सूत्रान्तरे च कमठे कमनीये च मूषके॥

कामकूटः प्रकाण्डे च विपाके वरुणालये।
प्रिये च विभ्रमे चैव ब्रह्मराक्षससंहतौ॥

कैशिकः पावके चन्द्रे वृत्तिभेदे च रङ्गणे।
मर्यादसूत्रे सामन्तगेहे च वरुणालये॥

शिविविष्टश्शङ्करे च शकुने रोदनेऽपि च।
शिवदूते च कूश्माण्डे ग्रहसञ्चारवर्त्मनि॥

कठो कठोरे वातूले मुनिभेदे च चत्वरे।
पण्याङ्गणप्रवेशो च पण्यस्त्रीमुखपङ्कजे॥

अम्बष्टो राजभेदे च देशभेदे विशां पतौ।
मार्ताण्डसूनौ सूर्ये च चन्द्रालोकनतत्परे॥

प्रतीकः प्रतिकूले च राजभेदे च मारुते।
कल्याणगोत्रे मातङ्गे निकषे च मसूरिणि॥

गोष्टगोस्थान भेदे च पलायनसमीरयोः।

हिरण्यकः कूपकूले ज्योतिशास्त्रविशारदे।
गणिके गणिकोद्योगे वनभेदे च नर्तने॥
निष्पत्तिकः कराग्रे च शब्दशास्त्रविशारदे।
नरकभेदके साम्यवस्तुसंचयनिग्रहे॥

प्रतिष्ठाकीर्तिविस्तारे पुरभेदे चराचरे।
मर्यादसीममार्गे च गर्भे च कमलाकरे॥

वातुतोदः कपाले च योगपात्रे प्रमार्जने।
सूतिकागेहसामीप्ये गानविद्याविशारदे॥

क्षेटो मृगपतौ धूर्ते कन्याजनपरिग्रहे।
प्रेङ्खोद्वर्तनलीने च पण्यस्त्रीमुखलोलुपे॥

गण्डके च नदीभेदे शिलाभेदे च कारके।
वीरे मुसलवक्त्रे च गरुडे गोगणे भके॥

प्रलम्बस्तु करम्बे च धान्यागारे प्रलीभने।
गाम्भीर्यशीले वस्त्रान्ते मृगभेदे च वीरुधौ॥

स्वरुस्तु धमने वीर्यशुक्ले वीररदनेऽपि च।
यागीय्य पात्रभेदे च जारस्त्रीसङ्गलीलुपे॥

हरिप्रिया तुलस्यां च महालक्ष्म्यां शिवार्चने।
तिथिभेदे च भूम्यां च शबर्यां राजसन्निधौ॥

श्रीमता विश्वकविना सर्वशास्त्रार्थवेदिना।
विबुधज्ञानसिद्धार्थं सप्तम: काण्ड ईरित:॥

अष्टम: काण्ड:

भाजीकरस्वामिभेदे पाचके पाचकालये।
सामन्तराजसन्माने वैद्यभेदे च वारिधौ॥

गारुडं मतभेदे च विषशास्त्रे मनोहरे।
वैद्यलौकान्तरे चैव ग्रन्थभेदे च वारुणे॥

विष्पत्ति: कर्दमेऽद्रे च दिक्पाले च मरुद्गणे।
वार्ताप्रचारे सन्मार्गे प्रियवाक्ये प्रतारके॥

घनाघन: कपाले च प्रवीरे च बलाहके।
देवेन्द्रे च शरत्काले दानशीले प्रजापतौ॥

क्षोभण: शक्रपुत्रे च शक्रे चैव विशांपतौ।
तस्करे पापचित्ते च कितवे राक्षसान्तरे॥

चर्षणी स्त्वासुरे मत्स्ये मन्त्रभेदे जगद्गुरौ।
विश्वासहीने कौमारे महोदधिसमीरणे॥

संक्रन्दनो देवभूमौ देवन्द्रे वृश्चिकान्तरे।
विषपल्लवि वातूले व्याख्यातरचितेऽर्भके॥

अनिमेषस्तु देवेन्द्रे देवतासङ्ग एव च।
योगदृष्टिविभेदे च दीर्घलोचनतत्परे॥

एकवीरस्तु राघेये शचीन्द्रे नानिकान्तरे।
श्रीरामे च महायोगपीठ भेदे कुरङ्गके॥

जिष्णुश्च जयशीले च देवेन्द्रे च बृहस्पतौ।
संसारत्यागशीले च महापर्वतमूर्धनि॥

यत्कारस्तु शचीन्द्रे च धान्यगर्ते च चत्वरे।
अविद्धकर्णे कर्णाटयुवतीभोगहार्ययो:॥

दुश्च्यावनस्तु देवेन्द्रे रोगभेदे च गह्वरे।
पूतिगन्धमुखे चैव दन्तनिस्सारभाषणे॥

पूतनाषाल्पबिन्दा शचीपतिकुशाग्रयो:।
सेनानायकभेदे च वाद्यभेदेऽगरुच्छानौ॥

अयोध्याब्रह्मणि श्रेष्ठे राजपुत्रे च शाबके।
मार्जाले च वियोगे च गन्धर्वनगरे खले॥

प्रयुत्सुर्युद्धशीले च शतक्रमतुसमीरयो:।

दैत्ये च वृक्षभेदे च यागमार्गविशारदे॥

जतिस्तु जयशीले च जये जाग्रतमानसे।
प्राणायामप्रभेदे च सुषुम्नानाडिभेदके॥

जयति: शीघ्रबुद्धौ च जयत्यां मल्लिकागृहे।

जये च जयशीले च कृमिभेदे मसूरिणि॥

शार्धस्तु वाद्यभेदे च गोत्रभेदे प्रपाठके।
तूलयन्त्रे कूर्चके च तुलाराशिविभेदके॥

भूनवो वृक्षभेदे गोत्रभेदे शिवालये।
तीर्थवाहनभेदे च मदिराकान्तिशोधने॥

घोषस्तु ध्वनिभेदे च समुद्रनिनदेऽपिच।
पर्वतारोहणैव गोपालविनिवेशने॥

उदस्थो वायुपुत्रे च युद्धालोचनतत्परे।
ऊर्ध्वलोकनिवासे च महिषारोहणे घटे।

अनाधृव्यो यमे चैव नरके च शचीपतौ।
योगयुक्ते च मातङ्ग कराग्रे रश्मिकेतने॥

ऊचिष्मान् देवताभेदे हव्यभेदे च औषधौ।
विराटपुत्रे कबरे वमने मर्मघातिनि॥

परिष्टस्तु कराशे च प्रतिम्ना काम एव च।
परीक्षके च पाषण्डपाषणतलवीरुधे॥

व्रणो शाम्भविदूते च गृध्रपुत्ते यशस्करे।
करंभकूटे कङ्कोले नमस्काररते मखे॥

अश्मवो गालवधटे पाषाणपथिकंचूके।
कण्ठधारितलिङ्गे च चर्मरज्जौ शिताम्बरे॥

सरिष्यिन् प्रसरे कान्तहृदयङ्गमभाषणे।
मायानिर्मितकान्तारे नदीतीरस्थवीरुधौ॥

आपृश्चनं मन्त्रभेदे क्रिया भेदे गवीमुखे।
वृक्षकोटरकूश्माण्ड कनकाम्बुजवारिषु॥

वारे वृतं तु नीहारे निवारणपरिक्षयोः।
कल्माषपादे भाण्डीरे चर्मप्राहृतकन्धरे॥

उत्पलं चोत्पले वाले कूले भेके च मारुते।
काकध्वनौ च पाताले भागान्तरविशालयोः॥

वाशा तु मन्त्रभेदे च दिग्भेदे च दिगम्बरे।
तूलवृक्षे निशान्ते च मलपूरितशोणिते॥

कल्पस्तु कल्पभेदे च विद्यादाने विशारदे।
शामित्रहेमद्रव्ये च वर्ष घूर्तविषादने॥

गन्धर्वो देवभेदे च परिश्रमदरिद्रयोः।
सिञ्जात्यभागे नादे च शरत्कालप्रसूनके॥

गोखलो हर्म्यभेदे च धर्मव्याधसुतेऽपि च।
मर्यादसेतौ वार्तायां गोश्रृङ्गे गोखुरे विषे॥

भट्टारको मुनिश्रेष्ठे विप्रदासी च चम्पके।
दारुभेदनशीले च चमत्काररुतेऽन्तिके॥

हरिद्राको जातिभेदे वस्तुभेदे शिलिन्ध्रके।
मन्दारे गोसले सर्पे परात्मनि परामृशौ॥

झल्लिको वैद्यभेदे च प्रासादस्थ विहायसे।
रात्रौ झल्लिरर्वे क्रूरे यात्राभेदे च वायसे॥

मेधः पवित्रशोले च पवित्रे च रथन्तरे।
श्वपथे शलभे दीने मक्षिके स्वर्णकारके॥

लुलायको जन्तुभेदे वृक्षभेदे च कर्दमे।
महिषी जातिभेदे च निशीथे शशिसूर्ययोः॥

शोषणो देवभेदे च सूर्ये वै जातवेदसि।
रोगभेदे च श्रृङ्गारभेदे कर्दमरूषिते॥

शोविषाणो मन्त्रभेदे पैशाचवदनेऽपि च ।
विषाणमध्ये नक्षत्रपादभेदे दुरात्मनि ॥

क्रोडस्तु वृक्षभेदे च कराहे च निशां पतौ ।
जन्तुभेदे च मातङ्गे ब्राह्मणप्रवरे जले ॥

यज्ञियो हव्यभेदे च मन्त्रभेदे समुत्सके ।
समिद्भेदे चरोरन्त्यभागे भागपरिग्रहे ॥

करेणुस्तु कराग्रे च गजश्रेष्ठे मसूरिणि ।
नक्षत्रभेदे कान्तारे चन्द्रे बाल्ये वृषां पतौ ॥

कर्णिकारो वृक्षभेदे लाजभेदे च षट्पदे ।
दर्शे वैदर्भसारे च किंकातरुसूर्ययो: ॥

अवच्छिन्नसंयुते च संयुक्ताक्षरपङ्क्तिषु ।
क्षीरवृक्षे च गोपाले शार्दूलमुखमारुतौ ॥

हस्तिकर्ण: कपाले च धरणीमण्डलेऽपि च ।
गोपाले चन्द्ररश्मौ च विष्यत्तौ विष्णुसारधौ ॥

अरेणु: कान्तिभेदे च ग्रामसीमस्थवीरुधौ ।
उत्साहे च सुवर्षे च प्राकारपरिवर्तुले ॥

कौशेये मेघभेदे च सरस्वत्यां वशीकरे ।
वीरे चायुधभेदे च पर्वते च नदीतटे ॥

भरणे चैव मात्रायां लताभेदेऽनिश्चये ।
नक्षत्रभेदे गाण्डीवे धरण्यां धरणीपतौ ॥

गोद्दालो शैशवे माघमासे च कम सने ।
गौरीदोषसमद्भूत दूते वैद्यविशारदे ॥

रिपु: कपर्दिनी व्योम्नि गौरीदूते यमेऽपि च ।
शार्दूलविक्रमे चोर्वी विवरे कूपसाक्षिणे ॥

क्षौरपाणिस्तु चण्डालभेदे गोखखल्मीनि।
विश्वासहीने कुहरे ग्रन्थहेतुविचारणे॥

सोमस्कन्धो यागभेदे मन्त्रभेदे च वल्गुनि।
रोमाञ्चे रोमकूपे च विश्वासपरिशोधने॥

मरुद्वृधो सामभेदे वृक्षभेदे जनार्दने।
कोपहीने च चात्याले यागपात्रे विशोषके॥

रोहितको मत्स्यभेदे बाढायां चोपबर्हिणे।
विरुद्धधर्मसञ्चारे सेनाङ्गे यागवीरुधौ॥

ग्रामणिः ग्रामपाले च गौरी रोषसमुद्भवे।
प्रकाशके सान्ध्यरागे मुक्ताहारे प्रभञ्जने॥

धारको मत्स्यभेदे च सस्यभेदे सरीसृपे।
कान्तारगृहसान्निध्ये यौवराज्याभिषेचने॥

अतर्कणं तु शून्यांशे चावराधे नदीतटे।
गर्वयुक्ते च मूर्खे च पाषण्डे पशुमारणे॥

चतुलो वार्तिकाकारे युक्त्यान्तरपरिग्रहे।
विषवैद्ये च विश्वासहीने मृगमदे वने॥

सूनृतो राजमार्गे च हर्म्यावृष्टे विषोल्बणे।
कान्तिविस्तारदेशे च चन्द्रिका यन्त्रसन्निधौ॥

जर्तिलो राक्षसे क्लीबे सस्यभेदे च निश्चले।
अनिवार्यविरोधे च सरटामैथुने गले॥

दुर्कीटको सस्यभेदे वृक्षभेदे च जल्पने।
जक्ने वायसे शून्यागारे कपिविभेदने॥

वनीशानो वैद्यभेदे वृक्षभेदे जनाकुले।
राजमार्गप्रवेशे च यन्त्रिकारूढमानुषे॥

उद्दालको देवदूते मुनिभेदे जयान्तरे।
यमाङ्गणे कर्णिकारपृष्टे पुष्पायुधे घने॥

कुसुबिन्दः कपाले च मुनिपुत्रे च मार्गणे।
याङ्गभङ्गे प्रयासे च विवादविनिवारणे॥

हर्षिष्ठो हर्षयुक्ते च कन्यादानपरिग्रहे।
वीरे कङ्कण बन्धे च फले ब्रह्मर्षि सत्तमे॥

गैषो श्रृगालभेदे च गोष्टे नीचपरिग्रहे।
आह्वानभेदे नकुलासङ्गमे च यमे शिवे॥

दार्वो नृत्यन्तरे चैव यागीय्यपशुमारणे।
कीटभेदे च गर्भे च योनिमूले विहङ्गमे॥

आकृष्टस्तु महीपालदूते चाहर एव च।
सत्कले सान्द्रगोपाले वारस्त्रीमुखमारुते॥

अञ्जनी गन्धभेदे च द्रव्यभेदे च झंकृतौ।
कल्याणगोत्रे विक्षिप्त पूगद्रव्ये चरात्मके॥

कृषीवकः कशाग्रे च गोपृष्टे रश्मिसाधने।
जातिभेदे वृक्षभेदे गरुडे नीचसङ्गमे॥

शवस्तु सुकुमारे च देवेन्द्रे देवतागृहे।
मन्त्रभेदे सामभेदे वायुहीने प्रपूरणे॥

उद्दङ्की लालरम्ये च बीदने वायुभक्षणे।
विकटे विकलाङ्गे च दुत्तूरकुसुमे फले॥

चतुष्पदस्तु सिंहादौ ब्राह्मणे मरुताङ्गणे।
वकुले वायुकायन्त्रे विस्सारणसमीरयोः॥

किरीशः कपटद्यूते देवानां हृदयेऽपि च।
चञ्चरीकपुटे काले देवतायतने विषे॥

विक्षीणको देवसङ्घे मारीगणपतौ खले।
क्रव्यादहीनदेशे च वादित्रध्वनिसंस्तटे॥

विचिन्वन्यः परामर्शे देवतासङ्घ एव च।
वीरे वेदनशीले च मर्यादपरिवर्तने॥

अनिर्हातो देवसङ्घे प्राणिसङ्घे जनार्दने।
प्राणिहिंसारते जाले कर्णिकामुकुले खले॥

आमीवत्को देवसङ्घे देवदारुतरौ तथा।
कोटरान्तरकीटे च पशूनां परिमार्गणे॥

द्रावस्तु कर्दमे व्योम्नि कपर्दिनी विषोल्बणे।
दरिद्रयुक्ते मूर्खे च कलिकाकुसुमेन्धके॥

नीललोहित आसारे शङ्करे शम्भुपूजने।
वीरे राक्षसभेदे च वर्णभेदे निशां पतौ॥

शीघ्रायुस्तु शिवे विष्णौ वेगयुक्ते च चत्वरे।
लते विहगपङ्क्तौ च मार्जालनमरे भटे॥

शीभ्यस्तु शिववर्णे च शङ्करे नकुलात्मजे।
शाकभेदे च वृषभे झल्लिकागणनादिते॥

अवस्वन्यो मयूरे च शङ्करे पिशिताशने।
स्वस्थचित्ते प्रपामार्गे पीयूषे लगुढे जले॥

स्तोतस्यः कर्णिकावृक्षे शङ्करे विषभेदने।
आर्यावर्ते करम्भे च कृमिभेदे च तस्करे॥

द्वीप्यो द्वीपस्थजन्तौ च शङ्करे वायसान्तरे।
मर्यादहीने चाम्पये वेदव्यासे शिलीमुखे॥

अपगल्भस्तु निर्दोषे शङ्करे शङ्करात्मजे।
ग्रावस्तोतरि बिल्वे च स्वर्गे काश्मीरमण्डले॥

मन्दस्तु वृक्षभेदे च शिवदूते शिवार्चके।
यवागुभेदे चाल्ये च राजभेदे सरीसृपे॥

मधुपः कुसुमामोदे दरिद्रे चातरि त्विषे।
देवग्रशिल्पभेदे च मार्दवे मधुरे जले॥

श्रीमता विश्वकविना सर्वशास्त्रार्थवेदिना।
विबुधज्ञानसिद्ध्यर्थं अष्टमः काण्ड ईरितः॥

नवमः काण्डः

नमेरुस्स्याद्वृक्षभेदे नामभेदे शिलान्तरे।
व्यङ्ग्यायतनभेदे च चूडाकर्मणि वारिधौ॥

गैरिको धातुभेदे च किरातयवनेऽपि च।
कल्यान्तरप्रभेदे च गानविद्याविशारदे॥

गङ्गाधरशिशवे व्योम्नि पर्वते च महोदधौ।
पाताले पक्षपङ्क्तौ च जरामरणवर्जिते॥

पितामहः कूबरे च वाद्यनादे चतुर्मुखे।
दक्षे दक्षक्रतौ छेद पितुर्जनक इङ्गिते॥

विश्वसिद्ब्राह्मणे चोरे विश्वकर्मणि नाविके।
सूर्याचन्द्रमसोरैक्ये ब्रह्मणि स्फुटवल्कले॥

सूर्यग्रहस्तु सूर्ये च राहौ केतौ च षट्पदे।
सूर्योपरागे चावर्ते विश्वस्तशुनके विषे॥

चन्द्रग्रहस्तु चन्द्रे च राहौ केतौ च पङ्कजे।
चन्द्रोपरागे मर्यादकरणे भूषणाम्बरे॥

भसिलो धवले रज्जौ भस्मनि ब्राह्मणे जले।
शङ्करे च सुरापाने विषभक्षणशीलयोः॥

अनहङ्कार आनन्दे शान्तचित्ते दिगम्बरे।
धरण्यां देवतास्थाने योनिमुद्राविशारदे॥

एकदन्त: परामृष्टे कबले च विनायके।
दैत्यभेदे वृक्षभेदे ब्रह्मणि प्रश्रिताध्वरे॥

वैडूर्यो रत्नभेदे च देशभेदे च सङ्करे।
हारे पर्वतभेदे च प्राड्विपाकमतस्थिते॥

मलिम्लुचस्तु नीहारे निवाराङ्कुर एव च।
पाप भेदे पापशीले योगछिद्रे च तिन्दुके॥

मलिम्लुचस्तु राजेन्द्रे पापनिर्मोचनेऽपि च।
तस्करे तस्करालापे पिण्याकमुकुले जले॥

आग्नाया: पापशीले च राक्षसे च सरीसृपे।
वायुसेचमरीपाले करवाले च नाविके॥

मेध्यस्तु मुनिभेदे च स्वल्पे स्वल्पतमेऽपि च।
पुत्रौ पात्रे च शार्दूले तुलायां कनकाम्बरे॥

मीडुप्टमस्तु सूर्ये च शिवेदे, मङ्गलप्रदे।
तनये तालवृक्षाग्रे तानूनप्त्रे च तस्करे॥

तानून तु याज्ञेय द्रव्यभेदे शिलान्तरे।
खड्गायुधनिपाते च रोगभेदे कलान्तरे॥

स्वरुश्च यूपस्तम्भाग्र दार्वायुधकरण्डयो:।
मन्त्रमात्र्ये स्वर्णकारतनये वृश्चिकान्तरे॥

स्वधिति: यागसम्बन्धि पात्रभेदे रणान्तरे।
पीनस्तनविमर्दे च स्तनमूले च कार्मुकि॥

दीमं तु शून्यभेदे च निक्षिप्ते रजिताम्बरे।
शून्यालये कीटभेदे पृष्टदेशो दधूधरे॥

ईप्सितं चन्दने प्रामद्रव्ये च सरयूतटे।
प्रावणी पापनिवृत्तौ विद्यायसनकर्षिते॥

शिश्नियस्तु शिखाग्रे च यागीय्ये वेत्रकर्णयो:।
मत्स्यभेदे कराले च वीरभेदे च कर्षणे॥

अभीष्टकस्तु यागीय्य उपदानेऽष्टकेऽपि च।
बुद्बुदे कुहनाचारे वणिके नीचयाचके।
गुणदामो मालिकायां तन्तुदाम्निशिरीषयो:।
वैश्यान्तरे वैद्यभेदे कूटयन्त्रविशारदे॥

गुणधामस्तु सत्पुत्रे ब्रह्मविद्याप्रवर्तके।
सद्गुणाधारदेहे च शङ्करे च जनार्दने॥

मदरागो मन्मथे च बुद्धिभेदे च शङ्करे।
वैराग्ये वत्सरान्ते च वृक्षभेदे च कुक्कुटे॥

सहस्राक्षश्शङ्करे च देवेन्द्रे च जनार्दने।
वेषभेदे च दुर्गायां वायने चालनान्तरे॥

पाटल: श्वेतरक्ते च वृक्षभेदे गजान्तरे।
देशभेदे नदीभेदे कमलासनमूर्धनि॥

विभ्रान्तशील: उन्मत्ते विद्यावसनकर्षिते।
वानरे हासभेदे च मण्डले शशिसूर्ययो:॥

गुलिको वृक्षभेदे च शनिपुत्रे शनैश्चरे।
शनिप्रदोषसमये भक्ष्यभेदे कुलान्तरे॥

अण्डीगवस्सामभेदे मुनिभेदे च रारुले।
वाले जलदभेदे च कूश्माण्डग्रहभेदने॥

प्रातुद्रवो मुनिश्रेष्ठे सामभेदविचारयो:।
के पलायनशीले च कीटभेदे च मङ्गले॥

युधाजयो सामभेदे राजभेदे च मत्कुणे।
परब्रह्मणि भीःमे च चोलदेशे नरान्तरे॥

नार्मिदो रथसारथ्ये सामभेदे च गत्वरे।
वरे च रथनीडायां ध्वजस्तम्भे धनागमे॥

कालेयो मुनिभेदे च नामभेदे च कर्दमे।
कीटभेदे दैत्यभेदे च यमे च रणमूर्धनि॥

नधूनकस्सानुभेदे वृक्षभेदे जलान्तरे।
जातिहीननरे चैव ध्वनिभेदे च चत्वरे॥

शुक्रं धवलवर्णे च सामभेदे ग्रहान्तरे।
बकभेदे हंसभेदे चान्द्रायणरतेऽनले॥

चन्द्रं तु सामभेदे च ग्रहभेदे च सूरिणि।
व्याकर्णभेदे ग्रैवेये राजभेदे नृपाङ्गणे॥

वितद्वसुः कुबेरे च समुद्रे सागरान्तरे।
वैश्ये कर्णटदेशे च कर्णिकाकुसुमे शिवे॥

ऊतिस्तु देवताभेदे मन्त्रभेदे शिलान्तरे।
नदीभेदे वृक्षभेदे ध्वनिभेदे गजान्तरे॥

सदावृद्धस्तु मन्त्रे च सामभेदे रणान्तरे।
ग्रामकुक्कुटयुद्धे च विषवैद्ये च गर्दभे॥

अद्रीधो दैत्यभेदे च ऋत्विग्भेदे निशां पतौ।
गानप्रभेदे शिबिरे शिबिकारोहणे घने॥

प्रतीहारो वैद्यभेदे ऋत्विग्भेदे च वालुके।
भाषाभेदेऽश्वपुच्छे च ब्रह्मणि ब्राह्मणे जले॥

ब्राह्मणी भंस आहारभेदे वेदे शिलान्तरे।
रत्नभेदे च आह्वानभेदे यन्त्रनिराकरे॥

अग्नीदग्निभेदे च वह्निभेदे च दारुणे।
संज्ञान्तरे विभेदे च पलके फलकान्तरे॥

हादजिद्भेककूटे च कैतवे श्वेतकैरवे।
पिशाचोच्चाटने वीरकङ्कणे करुणारसे॥

विशेषजिद्ब्राह्मणणे च वैद्यभेदे च मारुते।
संज्ञाभेदे राजभेदे यज्ञभेदे विशेषगे॥

उन्नौत्यत्वं विवक्षायां ऋत्विग्भेदे गणान्तरे।
राजन्याज्ञापालने च विमले भक्तवत्सले॥

प्रसन्नवदना देव्यां गङ्गायां मकरायने।
सालग्रामे शिलाभेदे चञ्चरीके सताङ्गणे॥

गङ्गामहालक्ष्म्यां पार्वत्यां च जलाशये।
सरस्वत्यां च वीणायां तूणायां मालिकागणे।

क्रमुकः फलभेदे च वृक्षभेदे सरित्तटे।
बाणभेदे कीटभेदे वालयन्त्रे सलीमुखे॥

एणीसरः त्रिकाण्डे च एणीपङ्क्तौ मरुत्पथे।
लावण्यभेदे चार्वाकमतद्रे सरणे घने॥

अद्रुहः शाकभेदे च नदुतः करणेऽपि च।
मरीच्यपुत्रे शर्यातितनये कामुकान्तरे॥

अनूवो देशभेदे च राजभेदे यशस्करे।
दरीमुखे मयूरे च मुष्करे मकरालये॥

अवन्ध्यो दानशीले च मारुते पर्वतान्तरे।
कनके ब्रह्मविद्यायाः प्रवर्तनपरे जले॥

नार्मेधं सामभेदे च शिरीषकुसुमेऽपि च।
नाटीचित्ते च च तारे च नौकमध्यस्थदारुके॥

औशनं सामभेदे च प्रियसान्निध्य एव च।
सौरस्तं भाग्रभागे च ग्रामशक्तिमहोत्सवे॥

.......सूर्ये चञ्चुपुटेऽपि च।
धान्ये चोदितशुक्रे च सामभेदे जलान्तरे॥

प्रवद्धरगर्व आयास निकारणकरण्डयोः।
सामभेदे द्यूतभेदे पुरश्शुक्रे च दुन्दुभौ॥

कालेयस्तु पुरोभागे सामभेदे जलाशये।
वीरे राक्षसभेदे च यूवनाले करम्भके॥

श्रीमानैश्वर्यकामे च वैकुण्ठे विष्ठरे श्रवे।
गौरीपतौ शरण्ये च देवेन्द्रे च जनार्दने॥

वषटकर्ता हेतृभेदे द्रव्यार्जनपरेऽपि च।
कल्याणगुणकारित्वे वाद्यभेदे शिवार्चके॥

देशिकस्तु गुरौ राज्ञि वृक्षभेदे च पर्वते।
असूयरहिते कालभेदे सर्पबिले विषे॥

पिण्डस्थो देवभेदे च लिङ्गदेहे मुनीश्वरे।
कीटभेदे च कान्तारमध्यस्थवनवीरुधौ॥

विरटः ककुदे ग्रीवे स्कन्धे साकल्य एव च।
वीरुधे च विहारे च विषे कालागरौ जले॥

रोलम्बो मरुभूमौ च षड्पदे तावकान्तरे।
विश्वासहीने चार्वाके कमलासनवल्लभे॥

दाडिमो वृक्षभेदे च शिखरे च शिलान्तरे।
कार्तिके ये च कान्तारगुहे गुहचरे फले॥

कुकलासो जन्तुभेदे जातिहीने च चत्वरे।
गर्भान्धकारमग्ने च कारुण्यरसवर्जिते॥

कृमिलूनो मक्षिकायां मार्जालावदनेऽपि च।
कार्पासवृक्षकौमारवयसि ध्रुवमण्डले॥

गवीधरो पर्वते च कारुण्यरसपूरिते।
चार्वाक.... चारे गर्विष्टे च कुहूदरे॥

यजमाने गृहस्थे च यागकर्तरि नाकुले।
विषवैद्यै च गोद्दालश्रृङ्गे गौरमुखे तटे॥

मनसारो वृक्षभेदे देशभेदे च गार्दभे।
शून्यहस्तनिनान्ते च गायत्रीजपशीलेक॥

कमण्डलुधर: कोणपाले विरुधमण्डपे।
कल्याणगोत्रे कमले राजभेदे मुनीश्वरे॥

श्रीवत्सो गोत्रभेदे च राजभेदे करान्तरे।
तारुण्ययुक्ते चाम्पेये वीरुधे विष्णुलाञ्चने॥

स्वगस्तु मन्त्रभेदे च मन्त्रपूते च मागधे।
देशभेदे च चात्वालदेशे रम्यपरिग्रहे॥

क्रमुक: फलभेदे वृक्षभेदे सरित्तटे।
बाणभेदे कीटभेदे वालयन्त्रे करीमुखे॥

एणीसर: प्रकाण्डेच एणीपङ्क्तौ मरुत्पथे।
लावण्यभेदे चार्वाकमतप्रसरणे घने॥

अद्रुह: शाकभेदे च सदन्त:करणेऽपि च।
मरीच्यपुत्रे शर्वातितनये कामुकान्तरे॥

अनूपो देशभेदे च राजभेदे यशस्करे।
दरीमुखे मयूरे च पुष्करे मकरालये॥

आवन्ध्यो दानशीले च मारुते पर्वतान्तरे।
कनके ब्रह्मविद्याया: प्रवर्तनपरे जले॥

नार्मेधं सामभेदे च शिरीषकुसुमेऽपि च।
नारीचित्ते च नाके च कानमध्यस्थदारुके॥

औशनं सामभेदे च प्रियसान्निध्य एव च।
नाकस्तंभाग्रभागे च ग्रामशक्तिमहोत्सवे॥

ऊर्ध्वध्वागव ऊष्मे च सूर्ये चञ्चुपुटेऽपि च।
धान्ये चोदितशुक्रे च सामभेदे जलान्तरे॥

पुरध्वार्गव अयासनिकारण करण्डयोः।
सामभेदे द्यूतभेदे पुरश्शुक्रे च दुन्दुभौ॥

कालेयस्तु पुरोभागे सामभेदे जलाशये।
वीरे राक्षसभेदे च यावनाले परम्बके॥

श्रीमानैश्वर्यकामे च वैकुण्ठा विष्टरश्रवे।
गौरीपतौ शरण्ये च देवेन्द्रे च जनार्दने॥

वषटकर्ता हेतृभेदे द्रव्यार्जनपरेऽपि च।
कल्याणगुणशालित्वे वाद्यभेदे शिवार्चके॥

देशिकस्तु गुरौ राङ्गिवृक्षभेदे च पर्वते।
असूयरहिते कालभेदे सर्पबिले विषे॥

पिण्डस्थो देवभेदे च लिङ्गभेदे मुनीश्वरे।
कीटभेदे च कान्तारमध्यस्थवनवीरुधौ॥

विरटः ककुदे ग्रीवे स्कन्धे साकल्य एव च।
वीरुधे च विहारे च विषे कालागारौ जले॥

रोलम्बो मरुभूमौ च षट्पदे ताटकान्तरे।
विश्वासहीने चावकि कमलासनवल्लभे॥

दाडिमो वृक्षभेदे च शिखरे च शिलान्तरे।
कार्तिकिये च कान्तारगुहे गुहचरे फले॥

कुकलासो जन्तुभेदे जातिहीने च चत्वरे।
गर्वान्तरालमग्नौ च कारुण्यरसवर्जिते॥

कृमिलूनो मक्षिकायां मार्जालवदनेऽपि च।
कार्पासवृक्ष कौमारवयसि ध्रुवमण्डले॥

गमीधमो पर्वते च कारुण्यरसपूरिते।
चार्वाकमतसञ्चारे गरिष्ठे च कुहूचरे॥

यजमानो गृहस्थे च यागकर्तरि नाकुले।
विषवैद्ये च गोद्दालश्रृङ्गे गौरमुखे तपे॥

घनसारो वृक्षभेदे देशभेदे च गार्दभे।
शून्यहस्तनिनान्ते च गायत्रीजपशीलके।
कमण्डलुधर: कोणपाले वीरुधमण्डपे।
कल्याणगोत्रे कमले राजभेदे मुनीध्वरे॥

श्रीवत्सो गोत्रभेदे च राजभेदे करान्तरे।
तारुण्ययुक्ते चाम्पये वीरुधे विष्णुलाञ्छने॥

स्वगस्तु मन्त्रभेदे च मन्त्रपूते च मागधे।
देशभेदे च चात्पालदेशो रम्यपरिग्रहे॥

मूलकं द्रव्यभेदे च सैन्यभेदे निरन्तरे।
योगभेदे च कान्तारे प्रवेशविनिवारणे॥

क्ष्मातलो भूप्रदेशो च शान्तचित्ते यशस्करे।
मयूरपृष्टे गोमायूगणे गुणधने घने॥

नाभीकरो मेरुधीरे नानारन्ध्रे नदीतटे।
सव्यमार्गे महावायुपथे गोभरके स्थले॥

ईषदर्थकरो वाक्यजाले पदविजृम्भणे।
सूत्रे सूत्रान्तरे चैव नागवल्लीदले घने॥

अजवारो वृक्षभेदे गायके च सरीसृपे।
कनीनिकाग्रभागे च यागशीले शिलान्तरे॥

तोदस्तु रोगभेदे च कनकाम्बरमुद्ववे।
ईषदर्थविपक्षायां कमनीये जटाधरे॥

वशानुगः कराग्रे च दिक्ष्वाले ग्रहमण्डले।
नाभिपद्मे च लावण्यभेदे भेदार्थसङ्ग्रहे॥

एकहस्तस्तु गीर्वाणे दूते कीटकसङ्कुले।
वाद्यभेदे शैवदूतभेदे घुर्घुरनिस्वने॥

कुशाकर्णि सूत्रभेदे आचार्ये अवधूतके।
सन्यासभेदे वज्राङ्क कङ्कणे मङ्गले शिवे॥

नागान्तको वायूभेदे गरुडे तामसेऽपि च।
अग्निहोत्रविवाहे च कारुण्टरसवर्जिते॥

प्रसर्वको विष्णुदूत ऋत्विग्भेदे च मारुतौ।
धूमे धूमशिखायां च परीहासकरेऽर्चके॥

आरोहणं चावधानभेदे स्वरविपर्यये।
स्वरभेदे च कूश्माण्डग्रहे च विनिवर्तने।
मावङ्गो मन्त्रभेदे च पितणामर्चनेऽपि च।

कांस्यपात्रस्थ दध्यन्नभक्षणे च सरीसृपे॥

यमसुः कोपशीले च वार्ताहारण एव च।
कालसूत्रे मन्त्रपूतदेहे देहस्थकञ्चुके॥

नूपुरो रङ्गभेदे च पारीनलकशान्तरे।
अलङ्कारभेदे च विष्णुपूजादुरन्धरे॥

श्रीमता विश्वकविना सर्वज्ञेन महात्मना
विबुधज्ञानसिद्ध्यर्थं नवमः काण्ड ईरितः॥

हुताशनो महावीर्ये जीर्णदेहे चिरोषिते।
अग्नौ गृहस्थधर्मे च मार्कण्डेयसुते शिवे॥

कारुण्यवर्त्मसन्मार्गदर्शने धनिकालये।
देवलोकस्य मार्गे च ब्रह्मविद्याप्रकाशने॥

भक्तरागोन्नभेदे च जातके भक्तवत्सले।
कार्यानुकूलवृत्ते च गौरे गौरवयन्त्रिते॥

कामदो शङ्करे कार्यदक्षे शिञ्जितवर्त्मनि।
अकर्तरि महाशैलशिलाभेदे मणौ गुरौ॥

वीरश्लोकोऽर्जुने चैव कुमारे पुरुषोत्तमे।
कामुके यन्त्रभेदे च पक्षिभेदे च मूमुखे॥

अश्वदत्तः सेवके च याचके याचकान्तरे।
कामुके चैव चोन्मादशीले जागरदतत्वरे॥

नद्यावर्तो वृक्षभेदे वृक्षशृङ्गनिवारणे।
गायत्री बन्धने कीटभेदे गरुडवीरुधौ॥

युवनाश्वो राजभेदे मुनिभेदे च कर्कटे।
वापिसान्निध्यदेशे च अश्वभेदे जटात्मनि॥

नलिनं रुक्मभेदे च कीटभेदे च रक्षणे।
मुनिभेदे देशभेदे पद्मगन्धे विशां पतौ॥

दिनान्तो मुनिभेदे च सायङ्काले नदीतटे।
युगप्रलयसन्ध्याङ्गरागयोररुणोदये॥

अन्तश्शल्यो ज्ञातिभेदे कामक्रोधादिकेऽपि च।
रोगभेदे दन्तपङ्क्तौ गङ्गानिक्षिप्तशल्यके॥

कटुभाषो गार्दभे च क्रूरवाक्ये मरुद्गणे।
दूतिकावाक्यभेदे च वायुपूरितकोटरे॥

पर्जन्यो मेघभेदे च दानशीले शिलान्तरे।
क्रव्यादध्वनिभेदे च हर्म्यश्रेष्ठे विषोल्बणे॥

दारुको धनभेदे च कारके विष्णुसारथौ।
मर्यादशीले शैवाले जुञ्चाले दारुकान्तरे॥

कशेरु: खण्डभेदे च गजभेदे शिलान्तरे।
वृक्षभेदे ललाटे च तिलके तिलपृष्टके॥

सौम्यस्तु खण्डभेदे च सौम्यशीले रथान्तरे।
नागवल्लीदले चैव ऋणनिर्वापणे नटे॥

अन्धूरो राजभेदे च मुनिभेदे नदीतटे।
पक्षिभेदे च लालाटपट्टके पद्मबान्धवे॥

इन्द्रस्तु खण्डभेदे च नागायतबलेऽपि च।
शचीपतौ च श्रेष्टे च राजन्ये राजसन्निधौ॥

एकपाद: कठोरे च मारकान्तर इत्यपि।
पार्वतीरोषसंभूतदूते कर्कटकायने॥

याजुषो वेदभेदे च मन्त्रभेदे कलेबरे।
कमलासम्भवे वारिवाहे वै वारिजोदरे॥

अर्तूक: कपटचारे वातूले वार्धुषेऽपि च।
क्रव्यादरणरङ्गे च वीरुधान्तरचाम्पयो:॥

एकाशितिस्तुलाकोटे सङ्ख्याभेदे स्थलान्तरे।
मुनिभेदे ग्रन्थभेदे देव्या: चरणपङ्कजे॥

मालवो देशभेदे च राजभेदे शिलीमुखे।
वृक्षभेदे ग्रन्थभेदे वातूले कर्षके जले॥

कोङ्कणः पक्षिभेदे च मत्स्यभेदे कशाहने।
देशभेदे ग्रन्थभेदे मात्सर्यगुणसंयुते॥

मैधृवो राजभेदे च देशभेदे च चर्चरि।
यूने यूनसमूहे च दारिद्रवविनिवारणे॥

बीजस्करोऽग्निहोत्रे च वीरे धर्मपरायणे।
आज्ये मधौ च गन्धर्वभेदे चक्रप्रदर्शने॥

अनीना मत्स्यभेदे च स्थितां रणमूर्धनि।
विष्णुप्रसादसेवायां सेवाभेदे च मारुते॥

श्रीचक्रं यन्त्रभेदे च योनिस्थाने बिलौ सुते।
भूमण्डले च देवेन्द्ररथचक्रेऽवनीमुखे॥

शैशवो मार्दवे चैव गुरौ च वयसान्तरे।
मार्गमाणे च काम्पीलदेशवज्रमणौ हरौ॥

वैचित्र्यस्तु तुलाभारदाने दानपरेऽपि च।
राजन्यभेदे ग्रैवेयभूषणे करकान्तरे॥

कालान्तको यमे चैव वृश्चिके नाविकान्तरे।
भल्लूकमुष्टौ काषायवसने सत्यवागुरे॥

विभ्रमश्च विलासे च भ्रंशे मानसविभ्रमे।
कल्याणगोत्रे कानीने कन्यकानयने विषे॥

ईर्ष्यासहे गजेन्द्रे च शान्तचित्ते शिलातले।
धरणीमण्डले काममोहायुक्तजने जले॥

अनाशनस्तु तपसि वारिधौवरुणाचले।
मुनीश्वरे चेश्वरे च करवालान्तरे घने॥

वसूकरो राजभेदे भूतभेदे करान्तरे।
मर्यादशीले वातूले वच्यायनमते खगे॥

शालात्मको राजभेदे ग्रहशोधनतत्परे।
ग्रहशोधेऽपि च महाशालस्तम्भे गजानने॥

शुंशुमारश्चक्रभेदे राजभेदे च नूपूरे।
ग्रीवमध्यस्थशल्ये च कीटभेदे च सत्वरे॥

अगोष्टं मरुभूमौ च दरिद्रे च लतान्तरे।
अप्रसन्नमुखे चैव कात्यायनसुते जने॥

कठोरपाणिक्षुरकभेदे च यवनान्तरे।
वीरे राक्षसभेदे च गव्यान्तरनिषेवणे॥

शुक्तिकर्णो राजभेदे मारुते राक्षसान्तरे।
पार्वतीरोषसंभूत दूते वै राजवर्त्मनि॥

अनावृतो वृक्षभेदे आज्ञाभ्रष्टे च सत्वरे।
सर्पमार्गे नदीमध्यवृक्षे कनकवर्चसि॥

धरीको वातभेदे च शार्दूलसमविक्रमे।
पर्वते पर्वकाले च परितल्पे च तस्करे॥

वरकः कूर्मपृष्टे च वरुणस्य निवेशने।
करकङ्कणकीले च सस्यभेदे दृगन्तरे॥

कन्यादो राक्षसे व्योम्नि शिवदूते धनान्तरे।
राजन्यभेदे सलिलप्रवाहे मुनिसत्तमे॥

पिप्पलादो राजसे च मृगभेदे शिलान्तरे।
राजन्यभेदे मार्ताण्डकिरणे पल्वलोदके॥

मार्जनी पार्वती दूत्यं मार्जन्यां मालिकान्तरे।
पिशाचभेदे पवनभेदे घर्घुरनिस्वने॥

रोदाश्यो देवभेदे च नदीकूलविपर्यये।
शिश्वरोगप्रभेदे च देहान्तरनिषेवणे॥

ह्रीपरित्याग आनन्दभरिते निर्मलात्मनि।
लज्जात्यागविभेदे च सदन्तःकरणेऽपि च॥

घुरावर्तो शब्दभेदे वीरुधौ राक्षसान्तरे।
आवर्तभेदे कट्याङ्गदेशे देशविपर्यये॥

विलासकारि विख्यातकीर्तिसान्द्रे खगान्तरे।
विनोदभेदे कल्याणगिरिसानौ रसान्तरे॥

सोमश्चन्द्रे शङ्करे च मत्स्य भेदेस्थलान्तरे।
रोषे सोमलतायां च मांसचञ्चूपु टेदले॥

वशीधनसस्यभेदे च मरीमृगसंयुगे।
नीचजातिविभेदे च मन्त्रभेदे च वालुके॥

कीर्तिवाणि राजभार्याभेदे कीटान्तरेऽपि च।
विभक्तिभेदे निर्माल्यगन्धे गन्धकवीरुधौ॥

क्रियाविशेषो यागीच्यपात्रभेदे क्रियान्तरे।
धान्यराशिबिले चैव यूपकोणान्तरे स्वरे॥

अनार्तस्सामभेदे च मन्त्रभेदे रमामुखे।
पुष्याङ्कुरे प्रसूने च राजभृत्ये च कुड्मले॥

पुष्णावर्तो नदीभेदे द्रव्यार्जनपरेऽपि च।
क्षेत्रभेदे तीर्थभेदे वृक्षभेदे च नाकुले॥

सन्ध्यावर्तो विरूपाक्षे नदीभेदे शिवार्चने।
नन्दिकेश्वरदेहे च तद्धनौ साम्प्रतार्चने॥

पुष्कराक्षो दीर्घसत्रे व्यायामविनिवारणे।
महाविष्णुमहाकाण्ड पुनरे सर्पभेदने॥

कुम्बलाश्वतर: कूपभेदे मार्जालरोदने।

वस्त्रभेदेऽश्वभेदे च कठोरे वीरुधान्तरे॥
द्विपवक्त्रो वृक्षभेदे पार्वतीदूत इत्यपि।
मर्यादशीले कामारे मदहस्तिमुखे फले॥

विगतक्लेश अस्ति भेदे गोभेदे घनान्तरे।
राजभेदे च सम्पत्तिस्थविरे शुद्धमानसे॥

गजसाह्वाय आरामप्राकारगजसारथौ।
गजावर्तप्रभेदे च दूषके भूषणान्तरे॥

उक्कार्थनो शङ्करे च प्रम.........।
कविभेदे च चक्रे च चक्रनालायसान्तरे॥

एकत्रिंशत्तु सङ्ख्यायां मुनिभेदे निशाकरे।
विनायककरे चैव मतभेदे च मारुतौ॥

दमस्त: पत्रभेदे च .... रोषजेऽपि च।
राजभेदे त्रपाभेदे अङ्गणाच्छादनेऽन्तिके॥

व्यत्यासं हेमभेदे च न्यूनाधिकमतेऽपि च।
चञ्चलात्मनि नृपे च तरुच्छायावरोधके॥

उप........ सिद्धसस्ये तरुच्छायानिषेवणे।
मागधे मधुपासक्ते वने वनचरेऽनले॥

वशीयान् पुण्यशीले च तेज: पुञ्जे जनार्दने।
त्यागशीले धनासक्तचित्ते चित्तविशोधने॥

संभूतमन्नभेदे च चित्रगुप्तसुतेऽपि च।
चित्रमाल्याम्बरधरे वीरुधच्छायसेवने॥

त्रपुकारो लोहकारभेदे कर्णविशोधने।
जातिभेदविहीने च क्रव्यादपरिभाषणे॥

चित्रके.......... धर्व भेदे चित्रविशोदने।
राजन्यभेदे मात्सर्यगुणहीने च कामदे॥

कल्याणो गुणसम्पन्ने विवाहे शोधनेऽपि च।
गोदानव्रतचर्यायां सन्ध्यायां जलतर्पणे॥

.... शेभये शैववृक्षभेदेन तत्परे।
नक्षत्रभेदे वातूलचार्वाकमतसारयो:॥

तृणद्रुमो क्रमुकवृक्षे तृणगुल्मे दरीमुखे।
सरस्वती सेटकायां कत्यायनीसुतेऽपि च॥

कलादु: क्रूरचित्ते च विषवैद्ये च चञ्चले।
राहौ केतौ च सुग्रीवे सानौ पुरुषसेवने॥

नागान्तकस्तु गरुडे......... लान्तरे।
शङ्करे चौषधे वीरकङ्कणे स्रुवमार्जनि॥

उत्करो देशभेदे च कीटभेदे नृपाङ्कणे।
जाज्वल्यमाने गोविन्दचरणे शरणागते॥

सारघं मधुभेदे च वेद.......... च।
गानविद्याविवादे च गायके गगनान्तरे॥

मधूकृतो सामभेदे मन्त्रभेदे च वर्चसि।
सिंहासनकरे जाड्यहीने मधुरनिस्वने॥

मधूवृषो मेघपङ्क्तौ......... चत्वरे।
माधुर्यरसपूरे च गगनानन्तरवर्त्मनि॥

दुन्दुमारो देवाज्ञापालोच्छलेऽपि च।
चक्रसर्पविभेदे च कार्याकार्यविचारणे॥

आक्रन्दनो देवभेदे पुरोढे च वणिग्जने।
मार्गद्व्यापकर्षे च यूपदारौ धनान्त.........॥

विट्टन: ग्रामदूते च उपवेषे प्रभञ्जने।
यन्त्रमार्गविभेदे च घनशीले मनान्तरे॥

द्विपदो जन्तुभेदे च मन्त्रभेदे च मारुतौ।
गोत्रभेदे च मातङ्ग.................... ॥
विपाप्मा पुण्यशीले च नदीभेदे च कानने।
मृगभेदे कीटभेदे कार्यगारवयन्त्रिते॥

वित्तिस्तु कन्याभेदे च वायुभेदे च मारुतौ।
यागीच्यर्भपुंजीव हयमेधे मतान्तरे॥

अनापगो गोत्रभेदे मरुभूमौ विशांपतौ।
कीटभेदेऽन्धकारे च कारणे राक्षसान्तरे॥

शिवोतीतो राजपुत्रे फले वै चन्द्रसूर्ययो:।
क्षीरे नीरे च कनके छायावृक्षे च योगिनि॥

शोभनाकार आतानपद्मे भूषणसञ्चये।
सुवर्णे ब्राह्मणे विष्णुपादे राजन्यसन्निधौ॥

श्रीमता विश्वकविना सर्वज्ञानमहात्मना।
विबुधज्ञानसिद्ध्यर्थं दशम: काण्ड ईरित:॥

एकादश:काण्ड:

सूचनस्त्वषिते बीजे मात्सर्ये मर्कटेऽपिच
मरूत्सके च वातूले नारिकेलफले खले॥

श्लाघ्यस्तु पूजने वस्तुनिर्देशे करटत्मजे।
पुण्ये पुण्यतमे चैव माणिक्ये मदुसूदने॥

प्रयुत: प्राक्तने दान्ते नियमे नियतात्मनि।
मुनिभेदे गिरिश्रेष्ठे मणिविद्रुमपालयो:॥

इक्ष्वाकु: कतुतुंभ्यां च राजभेदेऽक्षुमूलके।

नागभेदे कपाले च माधुके मक्षिकालये॥
इयांस्तु स्वर्णसदने परिमाणे नृपाङ्गणे।
मार्ताण्डकिरणे चैव किञ्चिदर्थे च गुह्यके॥

लक्षितं चालवाले च सन्तोषे सत्यसङ्गरे।
प्रकाशने च सामर्थ्ये नेपथ्ये मुखम्परुने॥

केवलं ब्रह्माणि छायागुल्मे तस्करवर्त्मनि।
एकत्वे च पृथक्त्वे च सम्यगालोकने खगे॥

नियतश्शिक्षणे देववाक्ये वाक्यनिबन्धने।
वृन्तमूलेऽश्वबन्धे च नियतानीपवीरुधे॥

शमश्शान्ते च मित्रे च शामित्रे कर्दमाम्बरे।
मत्स्यभेदे च निगले निद्रायां योगपद्धतौ॥

प्लवनं तारणे कन्दमूले च भवभञ्जने।
तारणे जवने मत्स्ये घातके वालुयन्त्रके॥

शामित्रं च कुलाले च तद्धर्मे पशुबन्धने।
शालाभेदे खड्गपात्रे यज्ञपात्रे च याजने॥

वितस्तिः पात्रभेदे च व्यायामे मन्मथेरिते।

तिर्यञ्चे च मरीचे च मधुभेदे च सद्मनि॥

गरुत्पक्षे च मार्ताण्डे ध्वनौ मार्गप्रदर्शकि।
वीणावादे दीर्घसूत्रे पक्षे पक्षजमारुते॥

अवामः प्रापके चैव नीचे संग्रामवस्तुनि।
मोक्षमार्गे च सन्ध्यान्ते तदादौ च निवर्तनि॥

दक्ष्यस्तु कर्ण्यवृक्षे च राजभेदे प्रमातरि।
प्रतिमाशोधने जीवकलायां परिरक्षणे॥

विन्ध्यस्तु पर्वते वह्नौ द्विपभेदे च चत्वरे।
उन्मत्ते चोदधिस्नाने वानराणां विजृम्भणे॥

नहुषो राजभेदे च द्वीपभेदे च चञ्चले।
वृक्षभेदे कीटभेदे रत्नभेदे परिस्पृषौ॥

ममुषो द्वीपभेदे च मसृणे मर्मताड्णे।
मात्सर्ये मातृपूजायां देशभेदे च गुह्यके॥

कुशश्च दीपभेदे च च कुशनाभौ कुशाङ्कुरे।
श्रीरामपुत्रे वृत्रे च देशभेदे जनार्दने॥

शाकस्तु द्वीपभेदे च शाकभेदे निशाकरे।
आहारपरिणामे च देवदूते च चर्मणि॥

पारिप्लवो राजभेदे गन्धमूल्यादिसंहतौ।
मत्स्यभेदे यन्त्रभेदे सन्मार्ग.......... ॥

श्रुतिकीर्तिस्तु देवर्षौ दानशीले दयापरे।
नद्यां भरतभार्यायां ज्योत्स्नायां मृदुभाषणे॥

अरि प्रमश्शातृघाते वीरे वीररसेऽपि च।
मार्ताण्डे गरुडे खड्गे देवभेदे च कर्दमे॥

पुङ्गवो वृषभे श्रेष्टे वेदवाक्ये च वार्तिके।
वृकभेदे वृकोत्सङ्गे शैलूषविषवर्न्मनो:॥

उत्तान ऊर्ध्व भागे च राजभेदे प्रमातरि।
कल्पभेदे च कल्याणे कर्बुरे कांस्यमण्डपे॥

अनुत्तानो देवभेदे मुनिभेदे च दण्डके।
वृक्षभेदे च निर्व्याजे नीरन्ध्रे प्रत्यगात्मनि॥

व्यशीकरस्तु तुंबे च दिशीर्ण लोहनिर्मिते।
पलायने च मारीचवियोगे च नदीतटे॥

वल्गुश्च मार्दवे क्लीबे मृदङ्गध्वनिसारयोः।
मृदुवाक्ये चर्मपाणौ चर्मबिम्बे च मारुते॥

गुल्गुर्धरणीपाले च वृक्षभेदे च पट्टण।
सरस्वती दूतिकायां मद्यमांसनिषेवणे॥

मद्गुः कात्यायने मत्स्यभेदे कङ्कालपक्षिणि।
अङ्गरागे च धूर्ते च वक्रनक्रकुलासु च॥

छद्गुस्तु रोगभेदे च वृक्षभेदे च कृन्तने।
मार्जालवक्त्रे विपिने नदीमूले च पर्वते॥

सद्गुश्च भेदविद्यायां विप्रसङ्गे च दारुणे।
कपोलरोमकूपे च नरवभेदनपादयोः॥

विद्गुः पण्यफले पण्ये पण्यस्त्रीमुखमारुते।
नक्षत्रमार्गे सन्यासे गुदमूले निरर्थकि॥

वाचालः कालभेदे च बहुव्यायामकेऽपि च।
कपिगोष्टे रत्नभेदे बहुभाषणतत्परे॥

अलवालस्तु मार्ताण्डे राक्षसे बकसन्ततौ।

कूश्माण्डमूलिकायां च वृक्षाणामाकरिध्वनि॥
विशालोपस्तरे हर्म्ये गगने परमात्मनि।
नदीभेदे तुलायां च मायानगरभेदयोः॥

करलो भीकरे गोघ्ने व्याघ्रवक्त्रे दुरात्मनि।
वर्णभेदे च कुलाल भाषणे सर्पवीरुधौ॥

उशिरो वृक्षभेदे च पुत्रभेदे जगद्गुरौ।
वृत्तिहीने निरालम्बे मध्यमस्त्रीनिषेवणे॥

सुषिरोऽमात्यवर्गे च जतुकानिर्मितालये।
वृक्षभेदे च निद्रायां व्रतभेदे च रागिणि॥

मसूरस्सस्यभेदे च पिष्टभेदे च गृध्निनि।
हव्यभेदे नाट्यभेदे स्वर्णकारे च मत्कुणे॥

कुसूल: पद्मभेदे च हिन्तालदशनिर्मिते।
दु:शीले वर्तमाने च गत्यर्थे निकटे भवे॥

सुमन्तुर्मुनिभेदे च ग्रन्थभेदे च मस्तके।
पर्वतारोहणे चैव जपके मन्त्रभेदने॥

सुलील: कुशले मन्दे कृमिभेदे वियत्पथे।
गानभेदे च वेगे च निषादाङ्गणवीरुधौ॥

कलील: कलिवेगाङ्गप्रवाहे दारुभेदने।
परशौ परकान्तायास्सङ्गमे निजवर्मणि॥

सुशीलस्साधुवृत्तौ च मुनिभेदे च मातुले।
ब्राह्मणाङ्गणवृक्षे च धर्मशास्त्रे च पद्धतौ॥

.....दु:शील: क्रूरवृत्ते च स्त्रीभेदे कुलटात्मजे।
शूद्राङ्गणसमारूढवृक्षभेदे विनिन्दके॥

सुशीलो नृपभेदे च नीरे चैव जुतात्मनि।
वशीकरणमन्त्रे च क्षत्रियाङ्गणवीरुधौ॥

कुशील: क्रूरवृत्ते च पाटले पर्वतेऽपि च।
क्रूरसर्पे वृश्चिके च गहने च दुरात्मनि॥

कुविल: पर्वते चैव पद्मनाले दलीमुखे।
वैश्याङ्गणसमारूढ वीरुदौ बृहतीफले॥

मस्तिष्क्य: तरुभेदे च वामने मुकुलीकृते।
कुमारिकाप्रदाने च कुङ्कुमाङ्कितवक्षसि॥

हस्तिष्टश्शिवदूते च परीहासे च पर्वणि।
नाभिमूले गृध्रनीडे बकसंस्थानवीरुधौ॥

वस्तिष्टः कल्पभेदे च वृक्षभेदे दिगम्बरे।
मर्यादकारके बीजावापे कूपस्य सन्निधौ॥

यस्तिष्यः शत्रुदूते च रम्भामूले च कर्दमे।
कस्तूरिकालापने च द्रवयालिङ्गने घने॥

यस्तिष्यः शब्दजाले च यष्टिभेदे च गत्वरे।
याम्यायने वन्यवृक्ष मृगे च ब्रह्मराक्षसे॥

शशाङ्कस्तूबरे चेन्द्रे मयूराक्रोशनेऽपि च।
गजभेदे वृक्षभेदे नदीनां सङ्गमोदके॥

विकलाङ्ग पक्षिभेदे राक्षसे राक्षसात्मजे।
मयूरपृष्टे ग्रैवेये कलाहीने च चर्मदे॥

कलङ्को दोषचित्तस्य व्यापारे कमठे गले।
चन्द्रचिह्ने च पापे च पापात्मनि निरापदि॥

कलविङ्कः पक्षिभेदे राजभेदे चरात्मके।
नेत्ररोगे च शर्याते दैत्यभेदे च तत्पथौ॥

वैजयन्तश्चक्रपुत्रे दिग्गजे राजसन्निधौ।
वेश्यासंभोगजनितरागे च ब्रह्मराक्षसे॥

नक्रध्वजो मन्मथे च मन्मथागारसन्निधौ।
देवोत्सवे देवदूते दवघातनदीतटे॥

विकारो रोगभेदे च चित्तभ्रंशे चरातके।
राजभेदे चर्मगुल्मे गभस्तिनि निरामये॥

घुघरश्शब्दभेदे च खगे च वरुणालये।
मार्ताण्डमार्गे वातूले लैङ्गे नक्रस्य संस्थितौ॥

रदुः कपाले वध्ये च मतङ्गाश्रमसन्निधौ।
माहिष्मतिपुरे चैव महिषाणां विदारणे॥

सीत्कारो ध्वनिभेदे च कर्कशे कठिनेऽपि च।
वनप्रवेशने मूर्खचित्ते पापविनाशने॥

फूत्कारो मर्मभेदे च शब्दभेदे कुलायने।
कुलालवृत्तौ सत्कारे तापने तपनि स्थिते॥

चमत्कारो राजमार्गे शूद्रवस्त्रे नृपाङ्गणे।
उद्यानवनसंचारे मुदुवाक्यचयेषणे॥

दुर्विकारो बुद्धिभेदे रोगभेदे च वाशिके।
कृत्तिदाने च रथ्यायां दासीसङ्गे भ्रमात्मके॥

सत्कारस्तूबरे चैव पूजायां राजसन्निधौ।
सभामार्गे मृदङ्गे च गुरौ च गुरुपूजने॥

मृद्विकारश्शरीरे च कम्बुग्रीवादिमद्भटे।
कुलालदण्ड तत्पाले चीवरे च जटीकृते॥

कात्यायनो वर्ण भेदे मुनिभेदे च मारुते।
ग्रन्थभेदे च भेताले मन्त्रभेदे वशीकरे॥

वात्स्यायनस्तु देवर्षौ गोत्रभेदे मतान्तरे।
मत्स्यभेदे शरावे च द्रविणे ग्रन्थभेदने॥

साद्यायनः क्रियाभेदे शङ्करे शङ्करात्मजे।
स्वर्गलोके शिरोमूले कूले योगविदां वरे॥

साच्यायनस्तु सत्रे च भवानीवल्लभेऽपि च।
कन्धायां कन्धकारित्वे सूर्यमार्गेऽश्वपद्धतौ॥

मत्स्यायनस्तु कूपे च तटाके च ह्रदेऽपि च।
समुद्रे चैव नद्यां च जालके जालकालये॥

नागायनस्तु पाताले वीरुधौ कोटरेऽपि च।
गारुत्मतकरे चैव वने वनसमीपगे॥

क्षेम्यायन श्वोदने च पार्वतीवल्लभेऽपि च।
धने चैव सुते चैव स्वभार्यासङ्गमे मणौ॥

विद्यायनो गीष्पतौ च सरस्वत्याः भृगौ तथा।
परब्रह्मणि विद्वांसे चाकाशपथसन्निधौ॥

हृद्यांयनस्तु पृष्टे च पुत्रे पुत्रस्य सन्निधौ।
स्वभार्यालिङ्गने चैव वायसे च जले विधौ॥

पर्योस्तु वृक्षभेदे च गौरीशे पर्वतेऽपि च।
मार्ताण्डसूनौ सूर्ये च चर्मप्रादरणे खले॥

पर्णाशद्यस्तु शर्वे च परकान्तासमागमे।
निष्पत्रवृक्षे कान्तारे गाढालिङ्गनतत्परे॥

कर्णाशद्यस्तु वातूले पाञ्चरात्रमतेऽपि च।
राजभेदे वृक्षभेदे नदीभेदे च मारुतौ॥

भर्माशद्यस्तूपले च चमत्कारविनिर्मिते।
वेश्यासंभाषणे चैव जम्बुद्वीपस्य सन्निधौ॥

कर्मशद्यो निरालम्बसम्पदाप्रशरीरिषु।
वेश्यासंभाषणे चैव जम्बुद्वीपस्य सन्निधौ॥

कर्मशद्यो निशालम्बसम्पदाप्रशरीरिषु।
विताने वैनतेये च राजद्रुमीर्गले विषे॥

शार्यातिस्तु नृपाले च बाणभेदे मरुत्पधौ।
घण्टाकर्णे च विन्ध्याद्रौ विन्ध्यपर्वतसंनिधौ॥

उत्कालकस्तु मार्जाले मूषके मूषकालये।
कन्दुके सत्रयागे च मेरुपर्वतसन्निधौ।

हज्ञालकस्तु योगीन्द्रे योगीन्द्रानुनसन्निधौ।
योगभेदे योगमार्गे वेदान्तग्रन्थशोधने॥

मृज्ञालकः कुलाले च नदीमध्यगलेऽपि च।
सर्पमार्गे सर्पमृतौ सर्पयागे च सत्रिणि॥

घनाघनक्षोभणे च वर्षाकालघनेऽपि च।
लोकोत्तरप्रदाने च विष्णुभक्तनिषेवणे॥

दुश्चावनस्तु त्यागे देवेन्द्रे नर्मदातटे।
विश्वासहीने निष्क्रान्तौ पर्वतोपलसानुषु॥

वयुन्सुः पदभेदे च मर्यादावर्तने तथा।
सूर्यालोकनमार्गे च युद्धशीले जनार्दने॥

जतिस्तु देवतासङ्गे जयशीले श्रुतात्मजे।
काश्मीरदेशे जतुकाविद्रुमे तथा॥

द्विविगर्भे च शर्वर्यां शकुन्ते च शरावके।
कल्याणगोत्रे मेरौ च सन्मार्गे देवभूभुजे॥

अर्कपर्णे च गङ्गायां स्वर्णालङ्कारपङ्क्तिषु।

श्रीकरो राजसिंहे च विद्यायां करकामुखे।
भाण्डागारे सस्यपूर्णक्षेत्रे क्षेत्रज्ञकर्मणि॥

मर्यादो वृत्तिभेदे च वेदमार्गरमात्मनि।
वायुभक्षे निशालम्बे योगीश्वरहृदम्बुजे॥

शुभदस्तु मृदङ्गे च दर्पणे सूर्यवर्त्मनि।
गङ्गाकूले च शर्वर्यां जनार्दननिषेवणे॥

श्रीमता विश्वकविना सर्वज्ञेन महात्मना।
विबुधज्ञानसिद्ध्यर्थं दशमः काण्ड ईरितः॥

आङ्गिरास्सोमपाने च चक्रवाकखगे शुभे।
अगादेवे च सूर्ये च मन्त्रभेदे च शाश्वते॥

गमिष्णुः कुरुदेशे च प्रामकामस्य मानने।
देवभेदे च गरुडे मारुते वायुनन्दने॥

एकरात्रो यागभेदे व्रतभेदे च सस्वरे।
पशुभेदे मस्करे च चोलके दुहितुःपतौ॥

द्विरात्रो यजमाने च यागभेदे निशाकरे।
व्रतभेदे युद्धभेदे तिथिभेदे दिनान्तरे॥

त्रिरात्रः कष्टलग्ने च यागभेदे युगान्तरे।
ऋतुमत्यां पट्टणस्थ मस्करे याचकान्तरे॥

चतुरात्रो यागभेदे काणे च प्रथमार्तवे।
पात्रभेदे यज्ञशीले व्रतभेदे च वत्सके॥

अग्निस्तु ऋतुभेदे च विप्रहस्ते च याचके।
कीटभेदेऽग्निहोत्रे च सूर्ये च कनकाम्बरे॥

सूर्यस्तु पृष्टभेदे च क्रतुभेदे च मार्गणे।
विद्वत्पुत्रे चौषधे च व्रतभेदे प्रजागारे॥

चन्द्रमारुतभेदे च व्रतभेदे च तस्करे।
वृक्षभेदे राजभेदे मन्त्रभेदे च कार्मुके॥

प्रजापतिस्त्वनावृष्टिभये काम्यफलप्रदे।
राजन्ये ग्रामणौ शीलवृत्तिभेदे च मूर्धनि॥

प्रजापत्यं चाधिकारे व्रतभेदे च याज्ञिके।
इष्टिभेदे च गोवाले पशुभेदे च मारुते॥

स्मारं स्मरणभेदे च मान्नधीये समुत्करे।
ज्ञानभेदे........यतात्मनि ॥

ब्रह्मयोनिस्तु गान्धारदेशो च मुनिपुङ्गवे।
योगयुक्तशरीरे च शास्त्रे चाध्यात्मसंज्ञिके ॥

ऋतुजास्तापनश्रेष्ठे व्रतभेदे च गृध्निनि।
मुनिभेदे वस्त्रभेदे शस्त्रभेदे च चर्मणि ॥

रायिष्ठस्तु कुबेरे च वितिहोत्रे चतुर्मुखे।
सम्पन्नवैश्ये विश्वासहेतौ कामारिसेवने ॥

द्विमांस्तु वीतिहोत्रे च वरुणे चन्द्रसूर्ययोः।
ज्वालमुखे च ककुदे शार्ङ्गधन्वनि चक्षुषि ॥

इराप्रपाठने भूम्यां नदीभेदे च भूमुखे।
निशादौ चाज्यधारायां स्वाहाकारे च पट्टतौ ॥

स्वधुनी दीर्घसत्रे च दाढायां कर्णिकागृहे।
स्वर्गङ्गायां सुपर्यायां कामुकायां कणादिनि ॥

अव्यढ ईश्वरे व्योम्नि मूढापत्ये गणेश्वरे।
हयावर्तकि च समान्तशङ्कि चोराकृतौ खगे ॥

आषाढो मासभेदे च मुनिभेदे च दैवते।
वीरे पर्वतभेदे च नारिकेलद्रुमे फले ॥

घृणो वीरव्रते चैव दयायां चापखड्ग्योः।
मत्स्यान्तरे कोपभेदे वरीमार्गे निशाकरे ॥

वीरुधो मुख्यभेदे च गर्हिते च त्रपायुते।
नीरोगयुक्तदेहे च पांड्यदेशे च चञ्चले ॥

गुणवान् सूपभेदे च मौर्यान् चैव वृकोदरे।
अव्याक्षेपकरे चैव रसायनपिनाकयोः ॥

जरूढो वल्कचेले च वस्तुभेदे प्रमार्गणे।
जतुभेदे च शाके च करुणारसवर्जिते॥

व्रणस्तु मानभेदे च पुत्रिज्ञापरिपालने।
मोहिनीवृत्तचित्ते च घण्टामार्गे करण्डके॥

वणीसरो ख्यातकीर्तिविस्तारे मुखनेत्रयोः।
अनन्तफणसङ्घे च कान्तिपूजप्रसारणे॥

लोहिताश्वो राक्षसादिभेदे सूर्यरथेऽपि च।
राजभेदे वस्त्रभेदे सङ्घे चित्तमनोहरे॥

वेणुश्च कर्णपत्रे च जलजन्तुविशेषके।
अनाद्रफलभेदे च गायत्रीवर्णसंस्तरे॥

ऊर्णः प्रसादशीले च चन्द्रे दर्भपरिस्तरे।
काण्डप्रभेदने यमकर्मभेदे च शाङ्वले॥

कूणो वृक्षान्तरे सङ्घमरणे हश्विकान्तरे।
मत्स्यभेदे च कान्तारसन्निधाने वनस्थले॥

वात्यायको वातदेहे गुरुसान्निध्यवर्तिनि।
पूजाभेदे च सरसछायावृक्षनिषेवणे॥

प्रघणस्तापसारामे ताम्रपात्रे घनान्तरे।
स्वप्नभेदे च राह्वादीश्वरे श्रमनिवारणे॥

काकणिर्ध्वनिभेदे च दनुजे मानवान्तरे।
मानदण्डे मक्षिकादिदुहितद्रव्यसञ्चये॥

वैश्यादो जातिभेदे च वाणिज्यकरणेऽपि च।
न्यूनभूतधने चैव कनकाचलसन्निधौ॥

सारणिः कामभेदे च नटीभेदे सरीसृपे।
योग्यायोग्यविचारे च कामधेनुसुतेऽर्भके॥

महीवको जातिभेदे वृक्षभेदे च याचके।
नदीतीरकपाले च मायाविद्याविशारदे॥

रक्तरेणुर्वस्त्रभेदे सिन्दूरादौ खगान्तरे।
भूतभेदे कोपशीले गन्धभेदे च कुङ्कुमे॥

पारायणस्त्रिर्थांविद्यापारायणपरायणे।
पारावते च कार्त्स्न्ये च समासङ्गे निषेवणे॥

काम्भोजनिस्तु राजन्यभेदे साम्राज्यदीक्षिते।
वणिग्जने च मत्स्ये च तण्डुलक्षालितोदके॥

बादरायण आम्नाते चोन्मत्ते निष्प्रयोजके।
धान्यजीरकद्रव्यभेदे सपङ्गिनासुखे॥

अर्वरीणं वायुभेदे चान्नभेदे च चत्वरे।
माहिष्मतीपुरी दुर्गगोपुरे मारिषात्मजे॥

सुमानसं तु स्त्रीवस्त्रगन्धे कामुकमानसे।
कांस्यभोजनशीले च कन्यकाग्रहणेऽन्तिके॥

रोमहर्षण आतान वस्त्रे गन्धविलेपने।
रोमाञ्चे कन्यकाहस्ते सारणे च विभीतके॥

अवतारश्च जनने अधीलोकपरिग्रहे।
इच्छासृतिर्वेदमार्गे कविवाक्ये सरस्वतौ॥

स्त्रीसम्भोगे च योगांशे नित्यतुष्णौ मनोरथे।

आकारो ब्रह्मणि व्योम्नि स्वरभेदे जनार्दने।
अकारो विष्णुपूजायां देव्यां लक्ष्मिप्रवर्धने॥

इकारश्शङ्करे पद्मे भूषणे विष्णुलाञ्छने।
ईकारो ब्रह्मविद्यायां दुर्गायां श्रुतिसन्निधौ॥

उकारो वाग्विदां श्रेष्टे शङ्करे ब्रह्मणि ध्रुवे।
ऊकारो वार्तिकायां च लक्ष्म्यां गुर्व्यां नदीमुखे॥

ऋकारो ब्रह्मयज्ञे च विष्णौ शङ्करसूर्ययोः।
ॠकारो दीर्घसत्रे च धरण्यां मातृकागणे॥

ऌकारो लोकरक्षायां धारणे विष्णुमन्दिरे।
ॡकारो नागकन्यायां पार्वत्यां राजसन्निधौ॥

एकारो वृद्धिसम्पन्ने ब्रह्मणि ब्राह्मणेऽनले।
ऐकारो राजभार्यायां पूजायां कलुर्वीश्रृतौ॥

ओकारो ब्रह्मनिर्वाणे विष्णौ च परमात्मनि।
औकारो यज्ञशालायां जनन्यां शारदामुखे॥

अमप्सरोगणे शैवतन्त्रे विष्णौ च शङ्करे।
ककारो ब्रह्मणीशे च कारके करुणामये॥

खकारश्शाङ्गनादे च ब्रह्मणीश्वरसन्निधौ।
गकारो गानगन्धर्वहर्षप्रदवचस्स्वपि॥

घकारो मेघनादे च ऊर्मिनादे च शङ्करे।
ङकारो स्वरभेदे च वेणुनादे च शाश्वते॥

चकारो शिक्षरे चैव सर्वशब्दसमुच्चये।
छकारश्छन्दभेदे च पक्षध्वनिकरण्डयोः॥

जकारो जामदग्न्ये च जतुकाष्टे जलाशये।
झकारो झाङ्कृतौ चैव महावायुध्वनौ तथा॥

ञकारो वायुभेदे च स्वरभेदे च कर्तृके।
टकारो ग्रन्थतात्पर्ये लालने च मरीमृगे॥

ठकारो वेणुनादे च घण्टानादे च धारणे।
डकारो ढमृगे शैलकुहरे कूर्चिकायुते॥

ढकारो भेरिनादे च ढक्काध्वनिकुमारयोः॥
णकारो भीतिपभाज्यकृपाशूरेषु रक्षणे॥

तकारः प्रकृतार्थोक्ता ब्रह्महेतौ रमामुखे॥

थकारो ब्रह्मनिर्वाणे गायत्रीपठनेऽपि च॥
दकाररसुकलत्रे च सर्वलोकाधिपे गुरौ॥
धकारश्च सदाचारे ब्रह्मविद्याशुभेष्वपि।
नकारो युधि दाने च अस्मदर्थे शुभेऽपिच॥
पकारस्तु जटायां च प्रकृष्टार्थे च पर्वते।
फकारो ध्वानिभेदे च पिनाके सूर्यवर्चसि।
बकारो बलविस्तारे बके दारिद्रयमोचने॥
भकारशंकरे भावे भ्रमरे सात्विकेऽपि च।

मकारो व्याधिनाशे च वहनौ जीवे च घातरि।
यकारो निलये त्यागे कामे दातरि धातरि॥
रकारः पावके कामे भक्तसेव्ये मरुद्गणे॥
लकारो लालने लक्ष्मयां लशुने लगुदेऽपि च।
वकारो भयनिस्सारे पूज्ये सान्त्वे मनोरथे॥

शकारो सरले शाले कराले कनकाम्बरे॥
क्षकारो क्षत्रिये शान्त्यां धरण्यां लक्ष्मिवर्धने॥

श्रीमता विश्वकविना सर्वशास्त्रार्थवेदिना
विबुधज्ञानसिद्ध्यर्थं द्वादशः काण्ड ईरितः॥

मदुक्ता इमाश्शब्दास्सम्यगालोच्य सत्कृताः।
केचिच्छब्दप्रभेदाश्च केचिदर्थप्रभेदकाः।
केचिच्छब्दास्स्वतन्त्रेण भावार्थाद्यर्थबोधकाः॥

यस्सर्ववेदश्रुतधर्मशास्त्र पुराणकाव्यादिषु दत्तचित्तः।
स एव वाणी करुणाकटाक्षलब्धान्मदुक्ता लभते प्रवेशम्॥

नाधादि सर्वविदुषां श्रुतबोधहीनमानान्धकार परिवर्तितमानसानाम्।
वाणीविलासजनितां तनुरूप एष: कोष: कृत: कृतिमतां दृढकण्ठपाश: ॥

सरस्वती कृपावशान्मदीयवक्त्रसारसा
दिदं हि शब्दमण्डलं फणादिवारिखण्डनं।
अनल्पबुद्धिवैभवादखण्डपण्डितीवशात्:
पुन: पुन: विलोक्यतां पदे पदे सुपण्डितै: ॥

न भाणो न नाथो न विद्याधिनाथो
न भट्टो न नागो न वा भानुमिश्र: ।
मुहूर्तं समर्था भवन्त्युग्रवीर्या:
प्रवक्तुं ममाग्रे कुतोऽन्येकतुल्या: ॥

नानार्थप्रथमान्तोऽत्र सर्वत्रादौ प्रदर्शित: ।
समंम्यन्तेषु सिद्ध्यर्थं व्याकर्ण व्याकर्णपदवेदिना ॥

श्रीमद्विश्वकविर्विरिञ्चिवदनश्रेष्टासनाधिष्ठिता
वाणी वाणिजसर्वसूत्रजनितव्याकर्णमाकर्ण्य तम्।
आलोढ्यालोढय कोशं सकलबुधजनारञ्जनानन्दकन्दं
चक्रे चक्रगदाधराङ्घ्रिकृपया विश्वैकविश्वाभिधम् ॥

श्रीविश्वकोशं सम्पूर्णम्



Printed by

Royapettah Stationery and Printing and Allied Products Producers Indl. - Co.op Society Ltd.

26, Koya Arunagiri First Street Royapettah

Madras - 600 014. ☎ : 84 56 70